न चेदं पूर्वप्रमाणविषयग्राहि। अनधिगतविषयत्वात्प्रमाणस्य। अन्यथा चातिप्रसङ्गात्। अभ्रष्टदर्शनसंस्कारस्य गृहीतग्रहणस्य C8b स्मार्तादविशेषात्। निष्पादितक्रिये कर्मण्यविशेषाधायि साधनमित्यपि साधनन्यायमतिपतति। क्रमभावविरोधश्च सर्वासां तदर्थहेतूनां बुद्धीनाम्। अन्यैरकार्यभेदस्यापेक्षायोगादनपेक्षाच्च क्रमोत्पत्त्ययोगात्। आधेयभेदत्वे चान्यत्वम्। क्षणिकत्वादर्थानामतिपाताच्च नासतां ग्रहणम्। तस्मादर्थान्तरमेव प्रत्ययविशेषोत्पत्तेर्मनः प्रत्येति॥

सुखादीनां स्ववेदनम् ॥ (k.19d)

सुखादीनां स्वसंवेदनमपि प्रत्यक्षम्। सुखादिग्रहणं स्पष्टसंवेदनप्रदर्शनार्थम्। सर्वज्ञानानामात्मसंवेदनस्य प्रत्यक्षत्वात्। न हि A7b सुखादीनामात्मसंवेदने विकल्पः सम्भवति। यस्माद्

B7b **अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक्।**

नानुदितः प्रतिनियतः सुखाद्यात्मा विषयीक्रियते संवित्त्या।

---

x–x Cf. PV 3.241 y–y Ci' TR 30,10 z–z Cf. PV 3.242 a–a Cie NBhūṣ 101,7 b–b Ci'e PVA 307,11 (Stern: 157) c–c Ci'e PSṬ 1.53,14–54,1 d–d Ci'e NBhūṣ 101,7f e–e Ci'e PVA 307,13 f–f Cie? ĪPVV I 116,24 (Stern: 158) g–g Only k.21: NPṬ 39,8f; ĪPVV II 361,11f; 400,13f; Bhā 537,19f; NK[1] 654,12f; Ci'e TS 1263cd; Ce' PV 3.249 h–h Cie ĪPVV I 116,25 (Stern: 158) i–i Ci'e PSṬ 1.54,2–3

1f sya → °ṅgāt illegible in C 4 ati° AC : iti° B ◦ sarvāsām n.e. T 5 anyair AB : tadanyair C 9 svasaṃvedanam api AB : api saṃvedanam C 9f ñams su myoṅ ba T for saṃvedana

तस्यास्तदात्मरूपत्वात्। नैनमियमभिलापेन संसृजति' तथावृत्तेरात्मनि विरोधात्' तद्रूपस्य प्रागदर्शनादभिलापाभोगे च विषयप्रत्यस्तमयात्तदविवेकेन संविदोऽप्यग्राह्यग्राहकस्य च समयस्याभावात्' अन्येनाप्यतीतरूपस्यासंवेदनात्' अपुनर्भाविनि समयस्य वैयर्थ्याच्च॥

तेषामतः स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी॥ (k.21)

अशक्यसमयत्वान्न सुखादीनामात्मसंवित्तिराविष्टाभिलापा। सा C9a
प्रत्यक्षं प्रमाणम्॥

नैवं सुखादयः संवेदनरूपाः। एकार्थसमवायिना तु ज्ञानेन संवेद्यन्त इत्येके। तेषामपि

तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम्॥ (k.22)

तदतत्स्वभावानां भावानां ताद्रूप्यमताद्रूप्यं च पर्यनुयुक्ता हेतुप्रकृतिमेवं तेऽप्यालम्बेरन्तद्रूपहेतुजास्तद्रूपा अतद्रूपहेतुजा अतद्रूपाः' यथा शालिबीजादिभ्यस्तत्प्रसवास्तदन्येभ्योऽन्य इति' आकस्मिक-

---

j–j TR 31,10f; cf. PV 3.250 k–k TUS 228,18ff; NM I 195,8f; ŚVṬ I 239,12f; NKC 126,18f; AS 78,13f; SVR 174,9f; Vyom 627,18f (FRANCO 1987: 474f); NAVV 20,21f; Ce' PV 3.251

---

1 saṃsṛjati AB : sṛjati C 4 anye° BC : anyo° A ◦ sama° AB : yama° C 6 svasaṃvittir BC (PV) : svayaṃ vittir A 9 naiva BC : na vai A 13 bhāvānāṃ AC : om. B 14 eva n.e. T

त्वे देशकालप्रकृतिनियमायोगात्॥

तत्र सुखाद्युत्पत्तिर्नाविषया' यथास्वं विषयोपनिबन्धनानां सुखा-
दीनां तत्सन्निधानाभावेऽभावात्। नाप्यनिन्द्रियाः' रूपाद्यनुषङ्गिणां
A8a तद्विषयेन्द्रियविरहेऽदर्शनादनुपहतेन्द्रियोपनिधौ च पुनः सम्भवात्।
B8a नाप्यमनस्काराः' उभयसन्निधावपि मिद्धादिविप्लुतधियोऽभावात्।
एतावानेव विज्ञानोत्पत्तेरपि कारणकलापः। तत्प्रकृतेस्तत्कार्यस्व-
भावनियमे नानुपलम्भात्मानः सुखादयः। संस्कारान्नियम इति
चेत्' न' तस्य सामर्थ्यादर्शनात्। तन्मात्रभाविनोऽन्यहेतुत्वकल्प-
C9b नायामतिप्रसङ्गः। संस्कार इत्यपि पूर्वकमेव योग्यं विज्ञानमुत्प-
श्यामः' अन्तःकरणाभिपातिनां सुखादीनां विज्ञानभावनापटुमन्द-
तादिभेदानुविधानात्। हेतुसाम्यात्सुखादिभेदाभावप्रसङ्ग इति चेत्'
न' तस्याः सामग्र्या एवान्तरविशेषकृतत्वात्संशयनिर्णयादिभेदवत्॥

[m]नान्तराः सुखादयो नापि चेतनाः। तदात्मनां शब्दादीनामनुभ-
वात्तदनुभवख्यातिरि[m]त्यपरः। तस्यापि

[l–l] Ci'e TR 33,5f; cf. PV 3.254 [m–m] TN 32a2 (STERN: 158); Ci'e PSṬ 1.55,12f; cf. PV 3.268a–c'; TR 33,30f;

4 °endriya° AB : °endriye C ◦ °he 'darśanād illegible in C ◦ °opanidhau AB : °nidhau C ◦ sambhavāt BC : sambhāvāt A 5 nāpy amanas° C : nāmanas° AB ◦ °vipluta° AC : °upapluta° B 6 etāvān AC : etavon B ◦ eva AC : eva ca B 9 saṃskāra AB : saṃskāram C ◦ rnam par śes pa'i rgyu add. T 12 bheda n.e. T

[n][o]अविशेषेऽपि बाह्यस्य [p]विशेषात्प्रीतितापयोः[o]।
[q]भावनाया विशेषेण[q][p] [r]नार्थरूपाः सुखादयः[r][n] ॥ (k.23)

यदि हि शब्दाद्यात्मानः सुखादयः स्युः। शब्दाद्यविशेषे भावनाविशेषात्प्रीतिपरितापविशेषो न स्यान्नीलाद्याभासविशेषवत्। ते[s]ऽनपेक्षिततदतिशया भावना*नुरोधिनो बौद्धा एव प्रज्ञादिवत्[s]॥

[t]चेतनाश्चापि वेद्यत्वादतद्रूपाप्रवेदनात्[t]।

चेतनाश्चैते सुखादयः संवेद्यत्वात्। न हि यद्यद्वि*षयाकारं संवेदनं न भवति। तत्तस्य वेदकम्। अपरस्पररूपमिव सुखादिसंवेदनम्*। [u]इदमस्य संवेदनमिति सम्बन्धस्याभिव्यक्तिनिमित्तत्वात्। इन्द्रियादिष्वपि प्रसङ्गात्सारूप्यमेव तद्वेदनलक्षणम्[u]॥ A8b

सारूप्यमप्यतदात्मनः प्राक्पश्चादप्यात्माप्रच्युतेश्चैतन्यस्य कथम्- C10a
इति चेत्। अयमपरोऽस्य दोषोऽस्तु। न त्वसरूपं वेदकं* नाम। [v][w]न B8b
हि वित्तिसत्तैव तद्वेदना युक्ता। तस्याः* सर्वत्राविशेषात्सर्ववेद-

---

n–n NAVV 21,1f (LINDTNER 1984: 160f; SHIMODA 1988: 100); MaV 173,13f (STERN: 158) o–o TN 32a3 (STERN: 158) p–p ĪPVV II 236,5f (STERN: 158) q–q ĪPVV II 238,5 (STERN: 158) r–r ĪPVV II 235,24f (STERN: 158) s–s Ci'e TR 35,16f t–t Cf. PV 3.274b–d u–u Ci'e TR 34,14–16 v–v PrP 174,3–5; ŚVV 245,2f; ṚVi 78,19f; Bhā 542,10f; 544,14f; NR 206,17f; NKand 306,4f; SDS 15,5–6; ŚD 150,13–15 (STERN: 158); NK[1] 256,16–18 w–w Ci'e PSṬ 1.55,3–4

---

5 goms pa'i khyad par T for bhāvanā 7 yad <yad>viṣayā° em. (gaṅ źig yul gaṅ gi T) : yad viṣayā° ABC 8 myoṅ ba med pa T for saṃvedanam 12 vedakaṃ AC : samvedakaṃ B 13 tasyāḥ n.e. T

नाप्रसङ्गात्[w]। तां तु सारूप्यमाविशत्सरूपयन्तं घटयेत्[*v][1]। [x y]इदमेव च नः सुखं यत्सातं संवेदनमि[y]ति सिद्धाः सुखादयश्चेतनाः[* x][2]॥

विषयसारूप्या[3]त्संवेदनस्य तादात्म्येऽसंवेदनाः[*] सुखादय इति चेत्। [z]न। त्वत्पक्षेऽप्यस्ति सुखादि[*]संवेदनमि[z]ति दर्शना[*]र्थत्वादुपक्षेपस्य। [a]तत्रापि संवेदनमेवैकमान्तरं प्री[4]तिपरितापरूपं पश्यामः[a]। न [b]चास्या[*]यमात्मापरोपधानो[*b] युक्तः। तद्विशेषेऽपि स्वभावाभ्यासविशेषात्तदात्मातिशयसिद्धेः। बुद्धिरतिशयवती न संवेदन[5]मिति चेत्। [c]केयं बुद्धिः। अध्यवसायः। किमिदं[*] संवेदनम्। अनुभवः[c]। कोऽनयोर्भेदः। विषयाकारः पदार्थोऽसंवेदनोऽन्या संवित्। असंवेदनं सारूप्यं बुद्धिलक्ष[6]णमित्यन्यस्यापि त[*]त्सरूपस्य[*] तत्प्राप्तिर्विशेषो वा वाच्यः। अन्तःकरणत्वादयोऽपि तन्निबन्धना न वाऽप्रतिपत्त्यङ्गमित्य-
C10b नुघोष्याः[*]। तथाविधस्यान्य[*]त्रापि[*] स्वच्छत्वादेर्विशेषस्य भावात्। [de]सं-

---

[x–x] Cf. PSṬ 1.55,6–7 [y–y] ĪPVV II 47,17; 295,12 (Stern, letter 26.6.91); TR 34,23 [z–z] Ci'e TR 34,19f [a–a] Ci'e TR 34,27f [b–b] Cf. TR 34,19 [c–c] Ci' PVA 325,5 (VETTER: 68) [d–d] ĪPV I 101 n.17 (STERN: 158); cf. ĪPVV I 144,2–7 (STERN: 158 n.55) [e–e] ĪPV I 281,5; NAVV 88,7; Ci'e ĪPVV II 341,24; TĀV III 216,3; NVTṬ 342,3f; ŚVṬ II 131,25f; III 149,24f (STERN: 159)

---

[1] ghaṭayet AC : saṃghaṭayet B [2] siddhāḥ sukhādayaś cetanāḥ A : sukhādayaś cetanāḥ siddhāḥ BC [3] tādātmye 'saṃvedanāḥ AB : tādātmyāsaṃvedanāḥ C [4] sukhādi° A : sukha° BC ◦ darśanā° AB : pradarśanā° C [5f] cāsyāyam AB : cāyam C [6] °opadhāno AB : °opamāno C [8] idaṃ AB : i C [10] tat n.e. T ◦ sarūpasya AB : svarūpasya C [11f] anughoṣyāḥ AB : anud[0]ghoṣyāḥ C [12] °syānya° AB : °syām?-yanya° C ◦ api n.e. T

विन्निष्ठाश्च विषयव्यवस्थितयः[e]। ताः कथमचेतनोऽर्थो व्यवस्थापयेत्[d]। अतिप्रसङ्गात्। अतिशयवच्च बौद्धं सुखं अनतिशयेऽपि शब्दादिसुखा इत्यपि वार्त्तामात्रम्। एकत्र युगपदनयोर्विरोधात्। [A]तस्मान्न चैतन्यादन्यातिशयवती बुद्धिः ॥ A9a

[B]तद्रूपव्यतिरेकेण बुद्धेरनुपलक्षणात्॥ (k.24) B9a

[fg]एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्तं पश्यामः[g]। तत्र यथेष्टं सञ्ज्ञाः क्रियन्ताम्[f]॥

[hi]अप्रत्यक्षा[i] संवित्प्रत्यक्षो बुद्धिविवर्त इति चेत्। प्रत्यक्षो विषयोपभोगः। तदप्रत्यक्षत्वेऽन्यप्रत्यक्षवत्सर्वाप्रत्यक्षत्वप्रसङ्गात्। विषयोऽस्तीति च विषयोपभोगः प्राप्तः[h]। तद्भोगस्याप्रत्यक्षत्वादसिद्धेः सतोऽप्यसदविशेषाल्लैङ्गिकोपभोगस्य चाभोगत्वादन्यभोगवत्। लिङ्गायोगादतोऽप्यसिद्धिरेव। यथोक्तं प्राक्[j]। [k]तत्र च प्रत्यक्षे विषयोपलम्भे

[f–f] PVA 325,24; NM I 196,1f (VETTER: 70); TBV 27,28f; MṛV 85,5f; MaV 150,7f; TĀV II 109,5–7 (STERN: 159); PSṬ 1.55,7–9 [g–g] SN 15,4f; MaV 157,5; TĀV I 69,3 (STERN: 159) [h–h] MaV 150,4–6 (STERN: 159) [i–i] PVA 325,9 (STERN: 159) [j] Cf. 15,13–16,5 [k–k] MaV 150,6f (STERN: 159); Ci'e PVA 325,11f (VETTER: 70)

---

1 sems pa med pa des don T for tāḥ … acetano 'rthaḥ 3 vārttā<mātra>m em. (tshig tsam T) : vārttaṃ AC, vārttan*? B ∘ virodhāt B : vipratiṣedhāt AC 6 myoṅ ba ñid yin par T for saṃvidrūpam ∘ °viṣādādy° AB : °viśeṣādy° C ∘ °vivarttam AB : °vivarttanaṃ C 8 buddhi° AB : buddhir C 10 khyad par ma grub pa'i phyir T for asiddheḥ 11 laiṅgika° AC : laiṅgaka° B 11f rtags ma grub pa'i phyir T for liṅgāyogāt 12 de lta na T for tatra ∘ pratyakṣe AB : pratyakṣa° C

समाप्तो व्यवहार इत्यपार्थकमपरं चैतन्यम्[k]। तं चैकरूपमेव पश्याम इति [l]नान्या बुद्धिरन्योऽनुभवः[l]॥

[m]संसर्गादविभागश्चेदयोगोलकवह्निवत्।

विभक्तावपि चेतनाध्यवसायौ संसर्गविप्रलब्धोऽयं न विवेचयत्ययोगोलकमिव वह्नेः[1] तद्रूपस्पर्शाध्यवसायात्॥

C11a भेदाभेदव्यवस्थैवमुत्सन्ना सर्ववस्तुषु[m]॥ (k.25)

सर्वार्थोपलम्भेषु संसर्गशङ्कयैकत्वानध्यवसायाद्भिन्नोपलम्भयोरपि सुखादिनीलाद्याकारयोरनानात्वात्कं बतायमाश्रित्य हेतुं भेदाभेदौ व्यवस्थापयेत्॥

[n]अभिन्नवेदनस्यैक्ये यन्नैवं तद्विभेदवत्।
सिध्येदसाधनत्वेऽस्य न सिद्धं भेदसाधनम्[n]॥ (k.26)

[o]भिन्नाभः सितदुःखादिरभिन्नो बुद्धिवेदने।
अभिन्नाभे विभिन्ने चेद्भेदाभेदौ किमाश्रयौ[o]॥ (k.27)

---

l–l MaV 150,8; 157,3 (STERN: 159) m–m Only k.24: Ce' PV 3.277 n–n Ce' PV 3.278 o–o NAVV 21,7f (LINDTNER 1984: 161); Ce' PV 3.279

---

1 śes pa yod pa T for caitanyam 4 °sāyau AB : °sāyo C ∘ ayam n.e. T 4f vivecayati BC : vivecayety A 5 vahneḥ AB : vahnau C 6 utsannā AB : ucchannā C (cf. ucchinnā PV) 7 saṃsarga° BC : saṃsaṃsarga° A ∘ °aikatvā° AB : °aikārthatvā° C 8 bde ba daṅ sṅon po las sogs pa T for sukhādinīlādi ∘ batāyam AC : bataṃyem B; ayam n.e. T ∘ de dag add. T

इति सङ्ग्रहश्लोकौ ॥ B9b

अयोगोलकेऽपि वह्निसम्बन्धादर्थान्तरमेव तत्तथोत्पन्नमेकं दृश्यते। न नानारूपयोर्द्रव्ययोः संसर्गादविभागः। पुनस्तद्द्रव्यसन्तानस्थितिकारणविच्छेदात्तन्निवृत्तिस्तदुपादानकारणापेक्षिणश्च शीतस्पर्शादेरपरोत्पत्तिः ॥ A9b

तस्मादान्तराः सुखादयः संवेदनाश्च ॥

भावनाबलतः स्पष्टं भयादाविव भासते ।
यज्ज्ञानमविसंवादि तत्प्रत्यक्षमकल्पकम् ॥ (k.28)

योगिनामपि श्रुतमयेन ज्ञानेनार्थान्गृहीत्वा युक्तिचिन्तामयेन व्यवस्थाप्य भावयतां तन्निष्पत्तौ यत्स्पष्टावभासि **भयादाविव**। **तदविकल्पकमवितथविषयं प्रमाणं प्रत्यक्षम्**। आर्यसत्यदर्शनवद्यथा निर्णीतमस्माभिः प्रमाणवार्त्तिके ॥ C11b

कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः ।

---

p–p TSop 284,4f; NBhūṣ 171,12f; KV 47,9f; TĀV VII 170,3f q–q Ci'e PVA 327,16f (VETTER: 74); KV 47,12–14; NBhūṣ 171,14–16 r–r Cie DhPr 67,13 (VETTER: 74) s Cf. PV 2.146cd–279 t–t NM I 271,18f; TĀV VII 170,9f; BSS 150,19f; Ce' PV 3.282

16.383, Bh ad IPV 1.6.11

---

2 tat n.e. T 4 °dāt BC : °dot A ◦ ñe bar len pa T for upādānakāraṇa
5 rdzas add. T 9 gzuṅ ba ṅes pa'i don T for arthān gṛhītvā 10 spaṣṭā° C : spṛṣṭā° AB 12 °vārttik° illegible in A

अभूतानपि पश्यन्ति पुरतोऽवस्थितानिवं[*][t] ॥ (k.29)

[u]यथाविप्लवमावेगप्रतिपत्तिप्रदर्शनात्।[5]
परोक्षगतिसञ्ज्ञायां तथावृत्तेरदर्शनात्[u] ॥ (k.30)

[v]तस्माद्भूतमभूतं वा यद्यदेवाभि[*]भाव्यते ।
भावनापरिनिष्पत्तौ तत्स्फुटाकल्पधीफलम्[v] ॥ (k.31)[6]

इत्यन्तरश्लोकाः।

तथा ह्य[w]शुभ[*]पृथिवीकृत्स्नादिकमभू[*]तविषयमपि स्पष्टप्रतिभासं[*] निर्विकल्पकं च भावनाबलनिष्पन्नमिष्यते[w]॥

अस्तु नाम भावनाबलेन स्पष्टाभम्[7]' निर्विकल्पकं तु कथम्। यस्मान्

[x][y]न विकल्पानुबद्धस्य स्पष्टार्थप्रतिभासिता[y] ।

प्रत्यस्तमितार्थवैशद्यो हि सर्व एव विप्लुतधियोऽपि संसृष्टाभिलापः
B10a A10a प्रत्ययः। तन्नायं स्फुटप्रतिभासो[*][B] [A]विकल्पको भवितुमर्हति। तथा हि

स्वप्नेऽपि स्मर्यते स्मार्तं न च तत्तादृगर्थवत्[x] ॥ (k.32)

[u–u] TR 38,5f [v–v] SN 27,12f + 29,3; Ce' PV 3.285 [w–w] Ce'e PV 3.284 [x–x] Only k.32: Ce' PV 3.283 [y–y] TUS 190,17f (FRANCO 1987: 447); NBhūṣ 178,6; NPṬ 23,15

---

1 'vasthitān C : 'vastitān A, 'stitān B 4 eva n.e. T 7 aśubha° em. (cf. VETTER: 74) : aśubhā° ABC (cf. PV 3.284a; PVV 203,22) ∘ °kṛtsnādikam abhū° illegible in B ∘ °pratibhāsaṃ C, °pratibhāsan B : °pratibhām*? A 13 °bhāso AC : °bhāso cid api B

मिद्धोपप्लुतानाम[z]प्यनुभूतस्मरणाकारा[1] विकल्पा[z] भवन्ति। न च ते तथावभासिनः स्मर्यन्ते। [a]तन्न विप्लवोऽन्यो वा[2] विकल्पं स्फुटयति। अविकल्पक एव स्फुटावभास[a] इति॥

स्वप्नज्ञानं तर्हि* विशदाभं प्रत्यक्षं भवत्वविकल्पनात्। न। अभ्रान्तमिति निर्देशात्[b]। अत एव

[c][d]विकल्पोऽवस्तुनिर्भासाद्विसंवादादुपप्लवः[d]।
प्रत्यक्षाभो[c]

द्विविध उच्यते। वस्तुप्रतिभासं हि प्रत्यक्षम्। तदभावे तदाभासप्रच्युतेरित्युक्तम्। न चैवं **विकल्पः**। तत्प्रतिभासस्य वस्तुन्यननुरोधात्। तस्मात्प्रत्यक्षाभासः। विप्लवश्च C12a

ऽक्षजत्वेऽपि तदन्येभ्योऽविशेषतः ॥ (k.33)

योऽपि कश्चिद्विप्लव इन्द्रियजः। **तदन्येन्द्रियजाविशेषात्।** असावपि वस्त्वननुरोधिप्रतिभासो विप्रलम्भात्प्रत्यक्षाभासः। एतेन मानसोऽपि विप्लवो व्याख्यातः॥

---

z–z Ci' PVA 327,5f (VETTER: 76) a–a Ci'e PVA 327,6f (VETTER: 76) b Cf. k.4b' c–c NPṬ 23,17f (VETTER: 76) d–d TBV 500,14; 511,29 (VETTER: 76); NKand 441,5

---

1 °ākārā AC : °ākāro B 2 vā AB : om. C 4 tarhi BC : tahi A ◦ bhavatv BC : om. A 9f ananurodhāt AB : anurodhāt C 11 gźan las de T for tad-anyebhyaḥ 12 °jaḥ C : °jam AB ◦ °endriyajāviśeṣāt AB (°ād A) : °endriyaviśeṣāt C 13 °ananurodhi° AB : °anurodhi° C

[e][f]नैव द्विचन्द्रादिभ्रान्तिरिन्द्रियजेत्येके[f]। तन्न। [g]ऐन्द्रिये भावाभा-
वानुरोधस्य तत्त्वलक्षणत्वात्तस्येहापि तुल्यत्वात्। इन्द्रियविकारे च
विकारात्। तन्निबन्धनत्वाच्चाश्रयास्थितेः[g]। [h]सर्पादिभ्रान्तिवन्मनोभ्रा-
न्तेरक्षविकृतावपि निवृत्तिप्रसङ्गात्। तथाक्षविकारनिवृत्तावप्यनिवृ-
त्तिप्रसङ्गात्[h]। तस्मादिन्द्रियजमप्येतद्भ्रान्तेरप्रत्यक्षम्। अत एवेति
B10b करणंव्यवच्छिन्नाद्विकल्पवर्गात्पृथक्तैमिरोपलक्षितं विप्लवं प्रत्यक्षा-
A10b भासमाह[e] सापवादत्वसूचनार्थम्। [i]अन्यत्र चक्षुरादिपरमाणूनां द्वि-
चन्द्रनीलाद्याभासविज्ञानहेतुत्ववचनात्॥

[j][k]किं पुनरस्य प्रमाणस्य फलम्। प्रमेयाधिगतिः[k]। [l]सा हि ज्ञानम्।
C12b तच्च फलमिति किमिदानीं प्रमाणम्[l]। यत इयं प्रमेयाधिगतिरव्यव-
धाना तत्त्वं प्रतिलभते। तत्र

[e–e] Cie NBhūṣ 177,5f,8–11,12f   [f–f] Ce'e PV 3.294a   [g–g] Cf. PV 3.296   [h–h] Ce'e PV 3.297   [i] PSV on PS 1.15 (cf. PSṬ 1.62,5f; PVA 339,19f; PVV 206,26–207,3) and ĀPV on 2b (cf. FUNAYAMA 1999: 77f)   [j] Another edition of PVin 1.30,9–39,12 and 42,7–43,2 (pramāṇaphala) has been prepared by Birgit Kellner for her present study. I gratefully acknowledge a number of helpful proposals within this passage in her text of June 29, 2005.   [k–k] PVA 340,10 (Kellner, e-mail 31.10.05)   [l–l] PVA 340,12 (Kellner, e-mail 31.10.05)

1 °jety eke AB : °jaloke C   2 tasyehāpi BC : tasyaihāpi A ◦ °vikāre AC : °vikārā B   3 'di tsam T for tat   5 'khrul pa 'di ni T for etad bhrānteḥ ◦ iti n.e. T (the significance of iti is unclear to me)   6 karaṇa° n.e. T ◦ taimiropalakṣitaṃ AB : tirohi×taṃ C   6f °ābhāsam BC : °ābhaṃ A   7 āha BC : prāha A   8 °hetutva° AB : °hetu° C   11 tattvaṃ AB : ttvaṃ C

[mno]अर्थेन घटयत्येनां न हि मुक्त्वाऽर्थरूपताम्[o] ।
[p]तस्मात्प्रमेयाधिगतेः प्रमाणं मेयरूपता[p][n] ॥ (k.34)

[q]न हि क्रियासाधनमित्येव[3] सर्वं सर्वस्याः क्रियायाः साधनम्' किं तु या यतः[q]। [r]तत्रानुभवमात्रेण सदृशात्मनो ज्ञानस्य सर्वत्र कर्मणि तेनात्मना भवितव्यम्' येनास्येदमिति प्रतिकर्म[4] विभज्यते[r]। [s]अनात्मभूतश्चास्येन्द्रियार्थसन्निकर्षादिषु हेतुषु विद्यमानोऽपि भेदो भिन्ने कर्मण्यभिन्नात्मनो ज्ञानस्य न भेदेन नियामकः[s]' क्रियानिबन्धनत्वात्क[5]रणतत्त्वस्य तदविशेषे तस्या अपि विशेषासिद्धेः' सतोऽपि वा विशेषस्य तदनङ्गतयाऽकरणत्वात्। [t]तस्माद्यतोऽस्यात्मभेदादस्येयमधिगतिरिति अयमस्याः कर्मणि [6]नियमः' तत्साधनम्[t]। न चेयमर्थघटनाऽर्थसारूप्यादन्यतो ज्ञानस्य सम्भवति। न हि पटुमन्दतादिभिः स्वभेदैर्भेदकमपीन्द्रियाद्यर्थेनैतद्घटयति' तत्र प्रत्यासत्तिनिबन्धनाभा[7]वात्। [u]अस्त्यनुभवविशेषोऽर्थकृतः' यत इयं प्रतीतिः' न सा-

---

[m–m] Cie NBhūṣ 46,15–47,12 [n–n] NKand 306,2f; TBV 312,8f; 510,27f (VETTER: 78); TUS 256,4–6 (FRANCO 1987: 509); TR 44,2f; NPṬ 20,1f; SDS 15,3f; SVM 108,9f [o–o] PMi 20,14; Ce' PV 3.305ab [p–p] Ce' PV 306ab [q–q] Ce'e PV 3.301 [r–r] Ce'e PV 3.302 [s–s] Ce'e PV 3.303 [t–t] Ce' PV 3.304 [u–u] DAṬ 64,25 (JAMBŪVIJAYA 1981: 136)

---

[3] eva n.e. T [4] 'grub pa add. T ◦ °ātmano AC : °ānmano B [6] °māno AC : °māne B [8] mi 'grub bo T for asiddheḥ ◦ sato BC : sate A ◦ vā BC : om. A, n.e. T [9] de'i byed pa ma yin pa'i phyir T for akaraṇatvāt ◦ °ātma° AC : °ānma° B [12] de ltar T for etat [13] °nābhāvāt AB : °nāt C

रूप्यादिति चेत्[u]' [v]अथ कथं*मिदानीं सतो रूपं न निर्दिश्यते। [w]नेदमि-
B11a दन्तया शक्यं निर्दे[B]ष्टुम्। [x]अनिरूपितेन नामा*यमात्मना भावान्व्यव-
C13a
A11a स्थापयतीदमस्येदं नेति सुव्यवस्थिता भावाः[C][A][x][w][v] ॥

[y][z]तस्मात्प्रमेयाधिगतेः साधनं मेयरूपता[z][m] ।
[a]साधनेऽन्यत्र तत्कर्मसम्बन्धो* न प्रसिध्यति ॥ (k.35)

सा च तस्यात्मभूतैव तेन नार्था[2]न्तरं फलम्।
दधानं तच्च तामात्मन्यर्थाधिगमनात्मना ॥ (k.36)

सव्यापारमिवाभाति व्यापारेण स्वकर्मणि ।
तद्वशात्तद्व्यवस्थानादकारकमपि स्वयम्[a][y] ॥ (k.37)

इत्यन्तरश्लोकाः ॥

[b]एतेनेन्द्रियसन्निकर्षार्था[3]लोचनविशेषणज्ञानानि* प्रत्युक्तानि[b]' ततः कर्मसम्बन्धासिद्धेः' अव्यवधानाभावात्कारकातिशयासिद्धेः' [c]सर्व-कारकोपयोगेऽपि क्रियायामन्त्यस्य तस्यैव* भेदक[4]स्य साधकतम-त्वात्[c]। सत्स्वपीन्द्रियादिष्वभिन्नस्य प्रतिविषयं भेदकमस्य करणमि-ति*। [d]न हीन्द्रियाणि भेदकानि' सर्वज्ञानहेतुत्वात्[d]। [e]नार्थालोचनम्*'

[v–v] Cie DAṬ 65,1–3 (Jambūvijaya 1981: 136) [w–w] Cie MaV 191,6f (Stern: 159f) [x–x] Cie ĪPVV II 35,21f (Stern: 160) [y–y] Ce' PV 3.306–308 [z–z] NBhūṣ 49,12 [a–a] Ci' NBhūṣ 49,15–19 [b–b] Ce'e PV 3.310 [c–c] Ce'e PV 3.311 [d–d] Ce'e PV 3.312ab [e–e] Ci'e PSṬ 1.67,1–2

---

[1] katham AC : kim B [2] nāma n.e. T [5] °bandho AC : °bindho B [11] yaṅ add. T [13] antya<sya ta>syaiva em. (tha ma'i … 'di ñid T) : antyasyaiva ABC [14f] iti n.e. T [15] yaṅ add. T

अताद्रूप्ये तस्यैवं* [5]तदर्थालोचनत्वासिद्धेः। तथा विशेषणज्ञानम्[e]'
[f]अविषयकृतविशेषस्य विशेषणज्ञानविशेष्यज्ञानाविशेषा*द्व्यवस्थासि-
द्धेः[f]। [g]क्रियासाधनयोर्विषयनानात्वविरोधा*च्च। अभि[6]न्नविषयत्वे द्वयं
व्यर्थम्। क्रमभावश्चाभिन्ननिमित्तयोः प्रतिषिद्धः[g]। [h]सकृ*द्भावे साध्य-
साधनताऽभावः[h]' [i]ज्ञानांशयोस्तु साध्यसाधनभा[C]वो व्यवस्थाश्रय- C13b
त्वात्[i]। [j]वस्त्वभेदा[k]त्क्रियाकरण[7]यो*रैक्यविरोध इति चेत्' न' धर्मभेदा-
भ्युपगमात्*[k]। अभिन्नेऽपि वस्तुनि शक्तिभेदेन व्यवस्थाभेददर्शनाच्च
नायं वस्तुस[B]न्निवेशी व्यवहारः[j]। नापि सन्निकर्षः प्रमाणम्' [l]सर्वात्म- B11b
ना सन्निकृष्टस्यापि कैश्चिदेव धर्मैः प्रतिपत्तेः[l]। [m]तदविशेषेऽप्येष A11b
विशेषो बुद्धिप्रतिभासकृत[A][m] इति तस्यैव प्रामाण्यं युक्तम्॥

[n]अथ केयमर्थसंविद्या* प्रमाणफलम्। यदेवेदं प्रत्यक्षं प्रतिवेदनम्[n]।
[o]अ[2]स्तीदं वेदनम्' [p]तदर्थवेदनं केन। उत्पत्तिसारूप्याभ्याम्[p]। [q]अन-

---

f–f Cf. PV 3.313 bc   g–g Ce'e PV 3.314   h–h Ce'e PV 3.315ab'   i–i Ce'e PV 3.315'b–d   j–j Ci'e PSṬ 1.67,9–68,2   k–k Ce'e PV 3.318a–c   l–l Ce'e PV 3.316a–c'   m–m Ce'e PV 3.317ab   n–n Ce'e PV 3.320ab   o–o Ci'e ŚVṬ II 100,16–101,2   p–p Ce'e PV 3.320cd'   q–q Ce'e PV 3.323cd

---

[1] tasyaiva AB : tayaiva C   [2] <viśeṣaṇajñāna>viśeṣyajñānāviśeṣād em. (khyad par gyi śes pa daṅ khyad par can gyi śes pa khyad par med pa'i phyir T) : viśeṣyajñānāviśeṣād ABC   [3] virodhāc AB : nirodhāc C   [4] sakṛd° AC : sākṛd° B   [6] bsgrub par bya ba daṅ sgrub par byed pa dag T for kriyākaraṇayoḥ   [6f] dharmabhedābhyupagamāt BC : om. A; dharma° B : karmma° C   [11] °vid yā AC : °vit. .ma° B   [12–34,1] de ma thag pa T for anantaram

न्तरं* तर्हि विज्ञानं तुल्यविषयं विषयः प्राप्नोति[q]। [r]क्व तर्हीदानीमयमनुभवः। नन्वस्यैव रूपं* वयमप्यनुबुभुत्सवः[r]। [s]इ[3]दं दृष्टं श्रुतं* वेति दर्शनश्रवणाभ्यां यत्रावसायप्रत्ययः। ते तस्यानुभव इति चेत्। ननु सैव तयोः प्रत्यासत्तिरत्र* विचार्यते – कथं तं*त्तस्य दर्शनमिति। तयोर्हि [4]सम्बन्धमाश्रित्य द्रष्टुरेष विनिश्चयः*[s]। स तदभावे न स्यात्। [t]न च विषयसारूप्यं विज्ञानस्य। तत्प्रतिभासिनः स्थूलाकारस्य प्रत्येकं परमाणुष्वभावात्*[t]। एकश्चायं [5]ज्ञानसन्निवेशीति न च बहूनि रूपाणि C14a सञ्चितानि तथा प्रतिभान्तीति युक्तम्। एकरूपस्य बाहु[C]ल्यविरोधात्। बहुषु च तथाविधो नास्तीति न तयोः सारूप्यम्॥

[uv]नापि स्थूल [6]एको विषयस्तथावभासी। [w]पाण्यादिकम्पे* सर्वस्य कम्पप्राप्तेः। अकम्पने वा चलाचलयोः* पृथक्सिद्धिप्रसङ्गाद्[w]रक्तोदकवत्। [x]एकस्य चावरणे सर्वस्यावरणप्रसङ्गः[x]। अभेदा[7]त्। [y]न वा कस्यचिदावरणमित्यविकलं* दृश्येत*[yu]। अवयवस्यावरणम्। नावयविन इति चेत्। B12a अर्धावरणेऽप्यनावृतत्वात्प्राग्वदं*स्य दर्शनप्रसङ्गः[B]। अवय-

r–r Ce'e PV 3.321ab s–s Ce'e PV 3.324–325 t–t Ce'e PV 3.321cd u–u DAṬ 44,5–7 (Jambūvijaya 1981: 135) v–v Ci'e NBhūṣ 104,8–16 (cf. NVTṬ 337,21–338,11 w–w Ce'e PV 2.84 x–x Ce'e PV 2.85ab' y–y Ce'e PV 2.85'bc'

2 tshul 'di ñid T for asyaiva rūpam ∘ śrutaṃ B, śrutam C : śruta A 4 atra n.e. T ∘ tat AB : om. C 5 viniścayaḥ AC : niścayaḥ B 7 abhāvāt A : apy abhāvāt B : asambhavāt C 10 gcig g.yo na T for kampe 11 calācalayoḥ AC : calayoḥ B 13 avikalaṃ AB : avikalyaṃ C ∘ dṛśyeta BC : dṛśyet* A 14 sṅa ma kho na bźin du T for prāgvat

वद्वारेण तद्द[A]र्शनाददृष्टावयवस्यास्याप्रतिपत्तिरिति चेत्। न। भेदा- A12a भावेन सर्वथाऽप्रतिपत्तिप्रसङ्गात्। सर्वावयवानां च युगपद्द्रष्टुमशक्यत्वात्सर्वदा चास्यादर्शनप्रसङ्गः। कतिपयावयवप्रतिपत्तौ[2] दर्शनेऽल्पावयवदर्शनेऽपि तथा स्थूलस्य दर्शनं स्यात्। [z][a]रक्ते चैकस्मिन्रागः। अरक्तस्य वा गतिः।[a] अवयवरागे वाऽवयविरूपमरक्तमिति रक्तारक्तं दृश्येत। तस्मान्नैकः कश्चिद[3]र्थः। यो विज्ञानं सरूपयति[z]॥

अत एव

[b]**नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः।**
ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते[b] ॥ (k.38)

व्यस्तं हि विषयलक्षण[4]मिति **न** कश्चिद**नुभवो** नाप्यस्य कश्चि[C]त्। C14b तत्रापि **ग्राह्यग्राहक**लक्षणवैधुर्यात्। [c]तस्मादात्मैव बुद्धेरनुभवः। स च नान्यस्य कस्यचित्। प्रत्यक्षप्रतिवेद्यत्वमप्यस्यां[5] तदात्मतैव।[c] [d]**सा** च तादात्म्यात्**स्वयं प्रकाशते**। तेनात्मनः प्रकाशिकेत्यप्युच्यते प्र-

---

z–z DAṬ 44,7–9 (JAMBŪVIJAYA 1981: 135) a–a Ce' PV 2.85'cd b–b TBV 483,20f; SVR 150,12f; NPṬ 24,7; NM$_K$ 294,4f; NR 275,19f (VETTER: 86); Vyom 525,20f; NBhūṣ 107,4f (cf.119,21); ŚVṬ II 101,21f; TRD 40,13f; ŚD 154,10f; SDS 13,2f; SVM 111,1f; AS 110,4f; Ce'e PV 3.327 c–c Ce' PV 3.326 d–d Ce'e PV 3.329a–c

---

1 adṛṣṭāvayava<syā>syāpratipattir em. (yan lag ma mthoṅ ba la de rtogs par mir 'gyur ro T) : adṛṣṭāvayavasyāpratipattir ABC ◦ bhedā° AC : bhodā° B 4 thams cad kha bsgyur ba T for rāgaḥ 5 rūpam n.e. T 6 naikaḥ AB : naiva C ◦ sarūpayati AC : sarūpaprati B 9 saiva BC : saivaṃ A (de ni de ltar T) 13 apy C : om. AB

काशवत्[d]। [e]नीलाद्यनुभव इत्यपि तत्स्वभावोऽनुभव एव[e]॥

[f]अवेद्यवेदकाकारा[6] यथा भ्रान्तैर्निरीक्ष्यते ।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा ॥ (k.39)

तथाकृतव्यवस्थेयं केशादिज्ञानभेदवत्।
यदा तदा न सञ्चोद्यग्राह्यग्राहकलक्षणा[f] ॥ (k.40)

इत्यन्तरश्लोकौ[7] ॥

[g]तदाऽन्यसंविदोऽभावात्स्वसंवित्फलमिष्यते[g] । (k.41ab)*

येषां बुद्धिरेवोपदर्शितग्राह्यग्राहकाकारोत्पद्यते' तेषामन्यस्य सं-
A12b वेद्यस्याभावात्स्वसंवेदनं फलम्*[9]' तत्स्वभावत्वादर्थप्रतिपत्तेः। [h]यदि
B12b हीष्टाकारः सोऽनुभवोऽनिष्टाकारो वा' तदेष्टोऽनिष्टो वा*[10] विषयः प्रतिविदितो भवति[h]। [i][j]विद्यमानेऽपि हि बाह्येऽर्थे यथास्वसंवेदनमेवार्थनिष्पत्तेस्तदेव[j] फलं युक्तम्। न ह्यर्थस्य यथास्वभावं व्यवस्थितिः[i]' [k]सर्वज्ञानानामेकाकारत्वप्रसङ्गात्[13]। अनेकाकारास्तु विज्ञप्तयः[k]' येनैकं रूपमेकस्य*[14] मनआपमन्यस्यामनआपं दृष्टम्॥

---

e–e Ce'e PV 3.328cd f–f Ce' PV 3.330c–332b g–g Ce' PV 3.332cd h–h Ce'e PV 3.340 i–i Ci'e PSṬ 1.68,12–14 (Kellner, e-mail 21.3.05) j–j Ce'e PV 3.341a–c' k–k Ci' PSṬ 1.68,15–69,1 (Kellner, e-mail 21.3.05)

---

7 Verse 41 has only two pādas, but cf. note on 37,7. 9 phalaṃ AC ('bras bu yin te T) : phalaṃ bhavet B 10 tadeṣṭo 'niṣṭo vā (tadā iṣṭo niṣṭo vā A) : tadeveṣṭo niṣṭo vā C : iṣṭāniṣṭo B; tadā n.e. T 11f eva n.e. T 13 °jñānānām BC : °jñānānam A 14 ekasya AB : ekaikasya C

[l][3]इष्टानिष्टावभासिन्यः कल्पना नेन्द्रियबु[C]द्धय इति चेत्[l] [m]न तत्रा- C15a प्यरिष्टादावप्रतिसन्धानदर्शनात्[m] अन्यत्रापि शब्दगन्धरसविशेषैरभिन्नैः प्राणिविशे[4]षाणामैन्द्रियक*स्यैव* सुखासुखस्योत्पत्तेः। तस्मात्स्वसंवेदनरूपैवार्थप्रतीतिः*। [n]तस्याश्च विषयाकारतैव साधनम् यथाकारमस्याः प्रथनात्। अर्थस्थितेः [5]स्वसंवेदनरूपत्वात्स्वविदपीयमर्थविदेव* कार्यतो द्रष्टव्या[n]। [o]अत एव [p]न प्रमाणफलयोर्विषयभेदः*[p]। स्वभावचिन्तायां तादात्म्यादर्थसंविदः स्वसंवि[6]त्फलमुच्यते*[o]॥

[q]तथाऽवभासमानस्य तादृशोऽन्यादृशो*ऽपि वा ।
ज्ञानस्य हेतुरर्थो*ऽपीत्यर्थस्येष्टा प्रमेयता[q] ॥ (k.42)

[r]यथाकथञ्चित्तस्यार्थरूपं मुक्त्वाऽवभासिनः ।
अर्थग्रहः कथं सत्यं* न जा[7]नेऽहमपीदृशम्[r] ॥ (k.43)

इत्यन्तरश्लोकौ ॥

[l–l] Ce'e PV 3.344ab (LINDTNER 1984: 164) [m–m] Ce'e PV 3.344cd [n–n] Ce'e PV 3.348c–349 [o–o] Ce'e PV 3.350 [p–p] DhPr 91,16 (VETTER: 90) [q–q] Ce' PV 3.351 [r–r] Ce' PV 3.352

---

[3] aindriyaka° A : aindriya° BC ◦ °va BC : °vu A [4] °ārthapratītiḥ AB : °ārthapratītāv arthapratītiḥ C [6] eva n.e. T ◦ °bhedaḥ BC : °bhedeḥ A; yaṅ add. T [7] This sentence is metrical in T, but unmetrically rephrased in PVin. Birgit Kellner proposed an emendation arthasaṃvitteḥ metri causa for arthasaṃvidaḥ and to identify tādātmyād arthasaṃvitteḥ svasaṃvit phalam ucyate || as the missing k.41cd. For an earlier attempt to solve these problems cf. LINDTNER 1984: 163f. ◦ ucyate C, ·cyate B (bśad T) : iṣyate A [8] °dṛśo AC : °dṛśe B [9] artho AB : ano C [11] satyaṃ BC : satya A

कथं पुनरसति बाह्येऽर्थे प्रमाणप्रमेयफलस्थितिः। उक्तमत्र – [s]यथादर्शनमियं व्यवस्था न तु यथातत्त्वमि[s]ति। विषयाकारः कश्चित्प-
A13a B13a रिच्छेदश्चा[A]न्तरः स्वसंविदितरूपो [B]जायमानो लक्ष्यते। तत्र यथालक्षणमेवेयं मेयमानफलस्थितिः ॥

[t u]अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते[u] ॥ (k.44)

C15b मन्त्राद्युप[C]प्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥ (k.45)

तथैवादर्शनात्तेषामनुपप्लुतचक्षुषां ।
दूरे यथा वा मरुषु महानल्पोऽपि दृश्यते ॥ (k.46)

यथानुदर्शनं चेयं मेयमानफलस्थितिः ।
क्रियतेऽविद्यमानाऽपि ग्राह्यग्राहकसंविदाम् ॥ (k.47)

अन्यथैकस्य भावस्य नानारूपावभासिनः ।
सत्यं कथं स्युराकारास्तदेकत्वस्य हानितः ॥ (k.48)

अन्यस्यान्यत्वहानेश्च नाभेदोऽरूपदर्शनात्।

s–s Cf. kk.39–40 (VETTER: 91) t–t Ce' PV 3.353–362 u–u NM$_K$ 294,6f

1 °phala° AB : om. C 2 iyaṃ AC : eṣā B ◦ viṣayākāraḥ AC : viṣayāraḥ B 4 meyamāna° AB (cf.k.47b) : mānameya° C 9 mig ... rnams kyis T for °cakṣuṣā 11 yathānudarśanaṃ ceyaṃ AB : yathādarśanam eveyaṃ C 13 °rūpā° AB : °dharmmā° C 14 °tvasya BC : °tvāsya A ◦ hānitaḥ AC : hanitaḥ B

रूपाभेदं हि पश्यन्ती धीरभेदं व्यवस्यति ॥ (k.49)

भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्माद्[5]एकमनेकं च रूपं तेषां न विद्यते ॥ (k.50)

साधर्म्यदर्शनाल्लोके भ्रान्तिर्नामोपजायते ।
अतदात्मनि तादात्म्यव्यवसायेन* नेह तत्॥ (k.51)

अदर्शनाज्जगत्यस्मिन्नेकस्याप्[6]इ तदात्मनः ।
अस्तीयमपि या त्व*न्तरुपप्लवसमुद्भवा ॥ (k.52)

दोषोद्भवात्प्रकृत्या सा वितथप्रतिभासिनी ।
अनपेक्षितसाधर्म्यदृगादिस्तैमिरादिवत् ॥ (k.53)

इत्यन्तरश्लोकाः ॥

भवतु नाम[7] यथादर्शनं प्रमाणादिव्यवस्था। विज्ञप्ति*मात्रतायां सैव* कथं सिध्यति। उक्तमत्र – [v]ग्राह्यग्राहकलक्षणा*योगादि[v]ति[w]॥

[x]अपि च

[y][z]सहोपलम्भनियमादभेदो नीलतद्धियोः[z] ।

[v–v] Cf. PVin 1.38c [w] Cf. 30 n. j [x–x] Cie NBhūṣ 107,7–108,3 [y–y] Only k.54: DAṬ 67,6f (JAMBŪVIJAYA 1981: 136) [z–z] ṚVi 79,6; NM$_K$ 297,5; 280,8; Vyom 527,11; SVṬ 418,13; ĪPVV II 78,22; SDS 13,9; NVinV II 226,11

---

5 °sāyena AB : °sānena C 7 antarupa° C : antarūpa° AB 11 vijñapti° AC : vijñāpti° B ◦ saiva AB : seva tu C 12 grāhya‹grāhaka›lakṣaṇā° A : grāhyalakṣaṇā° BC

A13b C16a B13b [a]न हि भिन्नावभा[A]सि[C]त्वेऽप्यर्थान्तरमेवं[*] रूपं नीलस्यानुभवात्[*] [B]तयोः **सहोपलम्भनियमाद्द्विचन्द्रादिवत्**[a]। [b]न ह्यनयोरेकाकारानुपलम्भेऽन्योप[*]लम्भोऽस्ति। न चैतत्स्वभावविवेके युक्तम्' प्रतिब[2]न्धकारणाभावात्[bx]। रूपालोकयोस्तु तज्ज्ञानोत्पादनयोग्यताप्रतिलम्भ[*]लक्षणोऽस्ति प्रतिबन्ध इन्द्रिययोग्यतोत्पत्तिलक्षणो वेति नानालोको रूपोपलम्भः स्यात्' कार्यस्य [3]कारणाव्यभिचारात्। नान्तरीयकतयालोकः सह रूपेण ग्राह्यलक्षणत्वाद्गृह्येत। [c]न वा[*] केवलस्याप्यालोकस्य दर्शनादनालोकस्य वा रूपस्य कैश्चित्प्रा[4]णिविशेषैरिति न तयोरपि[*] सहोपलम्भनियमः[c]। नीलाकारसंवेदनयोस्तु नियम एव। न स नानात्वे युक्तः' नीलपीतवत्॥

[d]विषयस्य विज्ञानहेतुतयोपनिधेः [5]प्रागुपलम्भः पश्चात्संवेदनस्येति चेत्[d]'

[efgh]**अप्रत्यक्षोपलम्भस्य[h] नार्थदृष्टिः प्रसिध्यति[gy]** ॥ (k.54)

[a–a] ŚVṬ II 107,9–11; TBV 364,13 (VETTER: 94) [b–b] BSBh 544,5f (STERN: 160) [c–c] Ci'e ŚVṬ II 107,12f; NPṬ 33,11f (STERN: 160); TSP 569,4f (Nishizawa, letter 21.7.95) [d–d] TSP 568,19f (VETTER: 96) [e–e] Cie NBhūṣ 108,5–9 [f–f] ĪPVV I 103,18–21 (STERN: 160) [g–g] NPṬ 12,13; 61,1; NVinV I 82,1, etc. (cf. index); NM$_K$ 304,11; 289,7 (VETTER: 96); ṚVi 75,24; NBhūṣ 133,21f; TBh 18,13; TSP 401,4; ŚVV 246,22; ŚVṬ II 100,5; J 478,7; SDS 12,14; NAVV 18,30; NR 216,5f [h–h] ĪPVV II 249,18

---

[1] eva AB : ava C ◦ °bhavāt AC : °bhāvāt B [3] nyopa° AB : savyanyopa° C [4] °pratilambha° n.e. T [7] na vā AC : om. B [9] api n.e. T

न हि विषयसत्तया विषयोपलम्भः। किं तर्हि तदुपलम्भसत्तया। सा
चाप्रामाणिका न सत्तानिबन्धनान्व्यवहाराननुरुणद्धि। तदप्रसिद्धौ
विषयस्याप्यप्रसिद्धिरित्यस्तङ्गतं विश्वं स्यात्। सतोऽप्यसिद्धौ सत्ता-
व्यवहारायोग्यत्वात्। तस्मान्नानुपलभमानः कस्यचित्संवेदनं वेद- C16b
यते नाम किञ्चित्॥

उपलभ्यते संवेदनमन्येनेति चेत्। स तावद्विषयः स्वोपलम्भका-
ले न सिद्धः सिद्धेरसिद्धेः। अन्योपलम्भकाले तु सिद्ध इत्युपल-
म्भेऽपि तदा न सिद्धोऽन्यदा विपर्यये सिद्ध इति सुव्याहृतम्। अन्ये- A14a
नापि संवेदनोपलम्भे सोऽप्यसिद्धः संवेदनं न साधयतीत्युपल- B14a
म्भान्तरानुगमः। तन्न तावदयं पुरुषः कश्चिदर्थं प्रत्येत्युपलम्भनिष्ठां
प्रतीक्षमाणः। एकासिद्धौ सर्वासिद्धेः। न चोपलम्भानामुत्पत्तिनि-
ष्ठेत्यन्धमूकं जगत्स्यात्। क्वचिन्निष्ठायां स स्वयमात्मानं विषयाकारं
च युगपदुपलभत इति तदन्येऽपि तथा स्युः। विशेषहेत्वभावात्।

---

i–i NBhūṣ 135,6f j–j NBhūṣ 135,7f (STERN: 160) k–k NBhūṣ 135,15; NVinV I 215,9 (STERN: 160) l–l ĪPVV I 103,21f (STERN: 160) m–m Cie NBhūṣ 108,10–14 n–n Cie ĪPVV I 103,22f (STERN: 161)

---

1 viṣayasattayā B : viṣayasattaya C : viṣaye sattayā A 2 °ruṇaddhi BC? : °rūṇaddhi A ◦ °siddhau AB : °siddho C 3 °syāpy apra° BC : °syāpra° A; api n.e. T 4 mi dmigs pa' phyir T for ayogyatvāt 4f vedayate A : saṃvedayate BC 6 upalabhyate AB : upalabhate C ◦ svopalambha° BC : svolambha° A 8 viparyaye AB : vipaye C ◦ °hṛtam AC : °kṛtaṃ B 9 saṃvedanaṃ AB : svasaṃvedanaṃ C 10 upa° AB : upe° C; °niṣṭhām AB : °niṣṭhā C 11 dmigs pa thams cad kyi T for upalambhānām 12 kvacin AB : kecin C 13 tat n.e. T

तत्सिद्धः सहोपलम्भनियमः[m]। एकव्यापारे क्रमायोगात्। तस्याविशेषात्॥

[o]संवेदनमित्यपि तस्य तादात्म्यात्तथाप्रथनम्[o]। [pq]न तदन्[4]न्यस्य कस्यचिदात्मसंवेदनवत्[p]। ततोऽपि न तदर्थान्तरे युक्तम्।[q] [r]अनर्थान्तरत्वे तु नीलादेरनुभवात्तदात्मभूतः प्रकाशते तथेति नीलाद्यनुभवः स्यात्[r]॥

[s]स च तादात्म्यात्तथाप्रकाशमानोऽपि[5] स्वपरात्मनोः प्रकाशकः

C17a स्यात्। प्रकाशवत्। [t]तस्माद्ग्राहकाकारः स्वसंविदः साधनमिष्टम्[C]। ततोऽस्यास्तद्भावव्यवस्थापनात्[t]॥

[u]तत्रात्मविषये[6] माने यथा रागादिवेदनम्।
इयं सर्वत्र संयोज्या मानमेयफलस्थितिः[u] ॥ (k.55)

[v]तत्राप्यनुभवात्मत्वात्ते योग्याः स्वात्मसंविदि ।
इति सा योग्यता मानमात्मा मेयः फलं स्ववित्[v] ॥ (k.56)

[w][7]ग्राहकाकारसङ्ख्याता परिच्छेदात्मतात्मनि ।

---

o–o Ci' ĪPVV II 78,23f p–p Cf. ĪPVV II 78,24f q–q ĪPVV II 78,21 r–r ŚVṬ II 100,4f (Stern: 161) s–s Cf. 30 n. j t–t Cf. PV 3.363 u–u Ce'e PV 3.364 v–v Ce' PV 3.365 w–w Ce' PV 3.366

---

1 °lambha° AC : °lambhaḥ B 3 tasya n.e. T 4 °cid AB : °kid C ◦ °vat AB : °vet C ◦ api AB : om. C 7 sa ca n.e. T ◦ raṅ daṅ gźan T for svaparātmanoḥ 9 asyāḥ n.e. T ◦ °sthāpanāt BC : °sthānāt A 11 saṃyojyā AB : saṃyojya C ◦ °meya° BC : °yeya° A 13 mānam BC : māna A

सा योग्यतेति च प्रोक्तं प्रमाणं स्वात्मवेदनम् ॥ (k.57)

इत्यन्तरश्लोकाः ॥

बाह्येऽप्यर्थे ततोऽभेदो भासमानार्थतद्विदोः ।

सत्यपि **बाह्ये**ऽ**र्थे** सहोपलम्भवेदनाभ्यां **भासमानस्य** नीलादेस्त- B14b A14b
त्संविदश्चाविवेकः सिद्धः ॥

द्वैरूप्यं तद्धियः

विषयज्ञानरूपाभ्यामतो द्विरूपा बुद्धिः सिद्धा भवति। यदि भासमानो विषयाकारो बुद्धेरभिन्नः। ततो भिन्नमस्तीति कुतः ॥

बाह्यसिद्धिः स्याद्व्यतिरेकतः ॥ (k.58)

सत्सु समर्थेषु अन्येषु हेतुषु ज्ञानकार्यानिष्पत्तिः कारणान्तरवैकल्यं सूचयति। स बाह्योऽर्थः स्यात्। यद्यत्र कश्चिदुपादानविशेषाभावकृतं कार्यव्यतिरेकं न ब्रूयात्। सोऽपि कथं सर्वज्ञानानां विषयं व्यतिरेचयन्नुपप्लवेतरयोः प्रमाणेतरतां ब्रूयात्। विशेषाभावात्। उपप्लववासनाविसन्धिदोषादप्रबुद्धस्याप्यनाश्वासिकं व्यवहार-

x–x ĪPVV III 32,14 (STERN: 161) y–y NM$_K$ 300,6 (VETTER: 100); Ci'e PSṬ 1.68,9 z–z ŚVṬ II 100,12f; VNṬ 15,25f; HBṬ 170,4–6 (STERN: 161); PSṬ 1.68,8f a–a Cie NBhūṣ 57,14–19 (LINDTNER 1984: 156f; YAMAKAMI 1984: 136f)

1 ca AC : om. B ◦ svā° AB : sā° C 3 °vidoḥ AC : °viptoḥ B 8 bhinna{ḥ}?m C ◦ śes add. T 12 med pas T for abhāvakṛtam ◦ °jñānā° A : °vijñānā° BC 13 pramāṇetaratām n.e. T

C17b मुत्पश्यन्नेकमप्रमाणं[*]माचक्षीत। अ[c]परम् आ संसारम[*]विश्लिष्टा[*]नुबन्धं दृढवासनत्वादिह व्यवहाराविसंवादापेक्षया प्रमाणम्। [bc]सां[5]व्यवहारिकस्य चैतत्प्रमाणस्य रूपमु[*]क्तम्। अत्रापि <u>परे</u> मूढा विसंवादयन्ति लोकमिति। चिन्तामयीमेव तु प्रज्ञामनुशी[*]लयन्तो विभ्रम[*]विवेकनिर्मलमनपायि पारमा[6]र्थिकप्रमाणम[b]भिमुखीकुर्वन्ति[a]। तदपि लेशतः सूचितमेवेति[*]॥

॥ प्रमाणविनिश्चये प्रत्यक्षपरिच्छेदः प्रथमः ॥[*]

[b–b] Ce'e PSṬ 1.75,1–3   [c–c] TBV 470,14; 497,28; VNṬ 14,26f; PMi 6,27f (Vetter: 100); J 419,14; SVṬ 489,20–24 (Lindtner 1984: n.23)

---

[1] ekam apramāṇam AB : ekaṃ pramāṇam C ◦ saṃsāram BC : sambhāram A ◦ aviśliṣṭā° AC : aviśiṣṭā° B [3] caitat pramāṇasya rūpam AB : caitadrūpaṃ pramāṇasya lakṣaṇam C [4] anuśī° BC : anuśrī° A ◦ vibhrama° AC : om. B [6] iti n.e. T [7] Manuscripts' and translation's colophons: pramāṇaviniścaye pratyakṣaniścayaḥ prathamaḥ paricchedaḥ samāptaḥ A; pramāṇaviniścaye pratyakṣaparicchedaḥ prathamaḥ BC; mṅon sum gtan la dbab pa la 'jug pa ste le'u daṅ po'o T

[ABC] [def]**अनुमानं द्विधा** A14b6 B14b6 C17b3

स्वार्थं परार्थं च[f] ॥

ज्ञानाभिधानरूपत्वान्न परापरप्रतिपत्तिनिबन्धनं[*e]। अपृथग्वचनं शब्दस्य विशेषाभावादिति चेत्' न' प्रवृत्तिभेदात्। अर्थो हि[*] लिङ्गिनं गमयति' तल्लिङ्गं शब्द इति[*]। न' लक्षणान्तरस्यावाच्यत्वात्। [g]यत्[*]किञ्चिदृष्टम्' तस्य यत्र प्रतिबन्धस्तद्विदस्तस्य तद्गमकं तत्रेति वस्तुगतिः[g]। [h]तत्र गमकलक्षणविधानेन[*] प्रतिपिपादयिषोर्वचनानुक्रमदर्शनं[*] कृतमेव' अन्यथाभिधाने गमकधर्माद्योतनात्। न हि ये[*] यथा यमर्थं विदन्ति वचनज्ञाः[*]' ते[*] तत्[*]प्रतिपादने पुनरुपदेशान्तरमपेक्षन्ते। सत्यमेतत्' तथापि बालव्युत्पत्तिनिमित्तोऽयमारम्भः। यथा[i]वस्तुप्रतिपद्यमाना अपि तद्[*]धर्माव्याप्तिव्यतिरेकाभ्यां निगदन्तो दृष्टाः' [C]अविनाभाववचनादुपमानसाध्यतदावृत्तिवचनानां च[*] प्रयोगात्[hi] ॥ (A15a B15a; C18a)

---

d–d Only k.1ab: DAṬ 125,14 (JAMBŪVIJAYA 1981: 140) e–e Ci'e TR 47,1f f–f Ce' PS 2.1a' with PSV (p. 447,8f); Ci' NB 2.1–2 g–g HBṬ 16,1 (cf. HBṬĀ 260,23–26); 69,5f; TBV 72,36f; 322,23; Ci'e NVTṬ 130,5f h–h PSṬ 2.B53b2–5 i–i DhPr 89,26f

---

3 °nibandhane AB (TR) : °nibandhanaṃ C 4 hi BC : om. A 5 iti n.e. T ◦ yat AC : yat kiñcit B 6 de ñid du T for tatra 7 brjod pas T for vidhānena ◦ °ānukramadarśanaṃ A (°ānukramo darśitaḥ PSṬ) : °ānukramasaṃdarśanaṃ B : °ānukramapradarśanaṃ C 8 ye n.e. T 9 vacanajñās BC : vacanājñās A ◦ te BC : om. A ◦ tat° n.e. T 11 tad° n.e. T 12 ca AB : punaḥ C

[j k]तत्र

स्वार्थं त्रिरूपाल्लिङ्गतोऽर्थदृक्[4][k d]।

[l]त्रिलक्षणा*ल्लिङ्गाद्यदनुमेयेऽर्थे** ज्ञानम्। तत्स्वार्थमनुमानम्*[j l] ॥

प्रत्यक्षवदस्य फलविकल्पो विज्ञेयः* ॥

[m]तदेतद्

[n o]अतस्मिं*स्तद्ग्रहा[p]द्भ्रान्तिर्*[m o] अपि सम्बन्धतः प्रमा[n p] ॥ (k.1)

[q r s]स्वप्रति[5]भासेऽनर्थेऽर्थाध्यवसायेन[s] प्रवर्तनाद्*[r] [t]भ्रान्तिरप्यर्थसम्बन्धेन[t] तदव्यभिचारात्प्रमाणम्[q]। न हि स्वभावः कार्यं वा भावकारणव्यतिरेके* भवतः। अभेदादात्मनिष्पत्तेश्च। [6]तथा तयोरभावे तज्जं ज्ञानं तत्प्रभवा वा* भावकारणप्रतिपत्तिः। तथा सति दृश्ये वस्तुन्यविकल-

j–j Ce'e PS 2.1'ab with PSV (p. 447,9–14); cf. NB 2.3 k–k SVR 23,9 l–l SVR 23,12f m–m NVinV II 3,17f n–n SVR 37,5; NAV 56,21f; TRD 41,16; ĪPVV I 238,12+14; ŚVṬ III 80,16; DAṬ 125,15 o–o NBhūṣ 195,14; 196,5 p–p DhPr 78,20; SVṬ 82,6f; 244,14; 365,1f; 417,19; TBV 508,17; ĪPVV II 91,4; Ci'e NBhūṣ 121,18f; TUS 176,2 q–q NBhūṣ 140,25f; ŚVṬ III 88,19f (Stern: 161) r–r DhPr 78,20; cf. AP 238,22f; NVTṬ 441,10; NM II 27,16f; NBhūṣ 195,15; 196,6f; 209,8f; NK[1] 197,10f (NK[2] 670,10); 257,23; ĪPVV I 239,18f; cf. SVR 37,1; Ci' NBṬ 47,1; 71,5; PVV 142,11 s–s ĪPVV I 271,15 t–t NBhūṣ 195,6f

3 trilakṣaṇāl AC : trirūpāl B ◦ arthe n.e. T ◦ anumānaṃ BC : ānumānaṃ A 4 vijñeyaḥ AC : jñeyaḥ B 5f tad etat | atasmiṃs AC : tad atad asmiṃs B 6 bhrāntir AB : bhrānter C 7 pravarttanād AC : pravarttamānād B 9 °vyatireke AB : °vyatirekeṇa C 10 vā AC : om. B

तदन्यकारणस्य दर्शनस्य व्यावृत्तिः। [u]न च स एव प्रतिभासोऽर्थो युक्तः*। तस्य पुनः [7]प्रत्यक्षेनान्यथा* दर्शनात्[u]॥

[v]यो हि भावो यथाभूतः स तादृग्लिङ्गचेतसः*।
हेतुस्तज्जा तथाभूते तस्माद्वस्तुनि लिङ्गिधीः[v]॥ (k.2)

[wx]लिङ्गलिङ्गि[B]धियोरेवं पारम्पर्येण वस्तुनि। B15b
प्रतिबन्धात्तदा[A]भासशून्ययोरप्यवञ्चनम्[x]॥ (k.3) A15b

[y]तस्यास्*तद्रूपशून्यायास्तद्रूपाध्यवसायतः।
तद्रूपावञ्चकत्वेऽपि कृता भ्रान्तिव्यवस्थितिः[y]॥ (k.4)

[za]मणिप्रदीप*प्रभयोर्मणिबुद्ध्याभिधावतः*।
मिथ्याज्ञानाविशेषेऽपि [2]विशेषोऽर्थक्रियां प्रति[a]॥ (k.5)

[b]यथा तथायथार्थत्वेऽप्यनुमानतदाभयोः।
अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितम्[bzw]॥ (k.6)

इति सङ्ग्रहश्लोकाः॥

---

u–u NVinV II 3,13 (SHIMODA 1988: 100) v–v Ce' PV 3.81 w–w kk.3–6: NBhūṣ 195,19–196,4 x–x Ce' PV 3.82 y–y Ce'e PV 3.83 z–z kk.5–6: NAVṬ 57,22ff; TRD 41,18–21 a–a Ce' PV 3.57 b–b Ce' PV 3.58

---

2 don daṅ ldan pa T for artho yuktaḥ ◦ pratyakṣeṇānyathā BC : pratyakṣeṇo nyathā A 3 °cetasaḥ BC : °cetasye A 7 tasyās AC : tasmās B 9 °pradīpa° BC : °pradīpā° A ◦ °dhāvataḥ C, °dhāvato B : °dhāvatoḥ A

[c]अत एव

[def]प्रामाण्यं वस्तुविषयं[f] द्वयोः[ec]

C18b [C]प्रत्यक्षानुमानयोः[3]। अर्थक्रियायोग्यविषयत्वाद्विचारस्य। [g]सुखदुःखसाधने ज्ञात्वा यथार्हं प्रतिपित्सवो[g] हि किञ्चित्परीक्षन्ते प्रेक्षापूर्वकारिणः। न व्यसनितया। न चानुमानप्रतिभास* एवार्थसाधनम्[4]। निरुद्धेऽप्यर्थसाधने वस्तुनि तस्यानिरोधात्ततश्च** कस्यचिदर्थस्यासिद्धेः*। अत एव* सदपि सामान्यं नार्थः। तस्माद्वस्तुरूपाविसंवादनमेव[5]ास्यापि प्रामाण्यम्। तत्प्रतिबद्धवस्तुलिङ्गापेक्षणाच्च॥

<u>आचार्यः</u> पुनर्

[h]अर्थभिदां जगौ[h]।

प्रतिभासस्य भिन्नत्वादेकस्मिंस्तदयोगतः[d]॥ (k.7)

न ह्येकस्य तावन्योन्यविलक्षणावाकारौ[6] युज्येते। तदालम्बनविषयभेदात्प्रमाणयोर्विषयभेदमाह। न प्रमाणव्यापारविषयभेदात्। भेद इत्यप्यस्याभेदप्रतिषेध एव द्रष्टव्यः। न* नानाविषयता। अनुमान[7]विकल्पस्य निर्विषयत्वात्। तत्प्रतिभासस्य स्वविषयसम्मतान्वयव्यति-

---

c–c Cie PVSVṬ 22,26 d–d Only k.7: NAVV 70,21f; NVinV II 4,2f (SHIMODA 1988: 100); NM I 159,1f (cf. NMG 40,5–10) e–e NBhūṣ 289,23; ĪPVV I 226,16; II 131,24; TBV 468,20 f–f ĪPVV III 201,11 g–g Cie HBṬĀ 397,15 h–h Cf. PS 1.2'b (p. 1,17) and PS 2.1'c–d with PSV (p. 448,4–8) (STEINKELLNER 1979: n.51)

---

5 de add. T 6 kyaṅ add. T ◦ ca AC : om. B ◦ arthasyāsiddheḥ AC : arthasya siddheḥ B 7 ata eva AC : ata eva ca B 14 na AB : na tu C

रेकाननुविधानात् प्रत्यक्षवत्सामान्यस्य च वस्तुनोऽन्यत्वेनावाच्य- B16a
त्वात्॥

कथमिदानीं द्वयोरपि प्रामाण्यस्य वस्तुविषयत्वे सामान्यस्य प्रति- A16a
पत्तिर्लिङ्गादन्यतः स्वलक्षणस्येत्याह –

अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात्।
सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः॥ (k.8) C19a

यत्प्रयोजना ह्यर्था ज्ञातुमिष्टाः तद्विपर्ययव्यतिरेकिणोऽर्थमात्रस्योपनिधायकं लिङ्गमिति **सामान्यविषयं प्रोक्तम्** ततो **भेदाप्रतिष्ठा**नात् न वस्तुसत्ताविप्रकर्षात् लिङ्गप्रतिपत्तेरपि तथारूपत्वादन्वयापेक्षणाच्च। इतरत्पुनर्भेदान्तरविमर्शविवेकेन प्रतिष्ठितेनैवं रूपेणाक्रियत इति स्वलक्षणविषयम् अपरस्मादर्थप्रतिपत्तेः। न त्वेवं पराङ्गात्प्रतीतिः तस्यासामर्थ्यात्। अर्थाविसंवादस्तु द्वयोरपि तुल्य इति वस्तुविषयं प्रामाण्यम्॥

[i–i] TSP 330,12f; PVSVṬ 19,23f; PVA 18,21; TBV 211,4f; AS 28,15f; PKM 181,17f; Vyom 685,30f; NVinV II 152,10f; TR 52,14f [j–j] Ci'e TR 52,16f [k–k] Cf. PVSV 67,24f [l] Cf. PV 1.40–47

---

1 °ānanuvi° AC : °ānānuvi° B 3 sāmānyasya AB : sāmānya° C 8f °āpratiṣṭhānāt AB : °āpratiṣṭhābhāvāt C 9 °viprakarṣāt C : °viprakārṣāt AB 10 eva n.e. T 11f parāṅgāt em. : parāṅgā BC, parāṃgā A 12 pratītis A : pratīti B : pratipatiḥ C ◦ °vādas BC : °vādās A

तत्*पुनस्त्रैरूप्यम्

[mnop]अनुमेयेऽथ तत्तुल्ये सद्भावो[p] नास्तितासति[o]।
निश्चिता[n] (k.9a-c')

[q]**अनुमेयो**[5]ऽत्र जिज्ञासितविशेषो धर्मी[q]। [r]तत्र दर्शनं प्रत्यक्षतो*ऽनुमानतो वा[r]। तथा **तत्तुल्य** एव च॥

[s]धर्मिविशिष्टस्यान्यत्र वृत्तिविरोधोऽविशेषणे वा नानुमेयधर्मतेति[6] चेत्[s]। [t]न[t]। अयोगव्यवच्छेदेन विशेषणात्॥

[uv]अयोगं योगमपरैरत्यन्तायोगमेव च।
व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचकः॥ (k.10)

विशेषणविशेष्याभ्यां क्रियया च सहोदितः[7]।
विवक्षातोऽप्रयोगेऽपि तस्यार्थोऽयं प्रतीयते॥ (k.11)

B16b **व्यवच्छेदफ[B]लं वाक्यं यतश्चैत्रो धनुर्धरः।**
पार्थो धनुर्धरो नीलं सरोजमिति वा यथा[v]॥ (k.12)

C19b **प्रतियोगिव्यवच्छे[C]दस्तत्राप्यर्थे[A]षु गम्यते।**
A16b **तथा प्रसिद्धेः सामर्थ्याद्विवक्षानुगमाद्ध्वनेः॥** (k.13)

[m–m] Only k.9: NAV 52,17f (LINDTNER 1984: 164f) [n–n] HBṬ 222,6f [o–o] HBṬ 223,21; Ce' PS 2.5cd (p. 455,9f) [p–p] HBṬ 16,3 [q–q] TR 47,13; Ci' NB 2.6 [r–r] ŚVV 142,8; TBV 94,34 (STERN: 161) [s–s] Ci'e PSṬ 2.B65b5–6 [t–t] Ce' PVSV 2,8f [u–u] Ce' PV 4.190–194 [v–v] TRD 35,11f,14–17; NAVṬ 25,20–26

---

1 tat n.e. T 4 °kṣato AB : °kṣa× C

तदयोगव्यवच्छेदाद्धर्मी धर्मविशेषणम्।
तद्विशिष्टतया धर्मो न निरन्वयदोषभाक्[u]॥ (k.14)

इत्यन्तरश्लोकाः॥

अन्ययोगव्यवच्छेदेन[2] च विशेषण एकस्य* तद्भावेऽन्यस्यातत्त्वं स्याद्विशेषणविशेष्ययोगिनश्च निपातस्याविशेषः। एतेन साध्यधर्मेऽपि विशेषणविशेष्यभाव उन्नेयः। तेन सत्यपि[3] विशेषणे नानन्वयः*। तथा [w]सामान्यं च साध्यम्। न च सिद्धसाधनम्*' तदयोगव्यवच्छेदस्यासिद्धेः[w]॥

[x]तत्तुल्य एवेत्यवधारणाद्धर्मिण्यवृत्तिरिति चेत्' न' अन्यनिषेधा[4]र्थत्वात्। [y]तत्र वृत्तौ लब्धायां [z]समुच्चीयमानावधारणम्*अन्यद्व्यवच्छिनत्ति'

[a]नरं च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयां बभूव[a]॥

इति यथा[zyx]॥

---

w–w NĪPP 135,17f; Ci'e PSṬ 2.B66a1; cf. PV 4.39ab (STERN: 161) x–x Ci'e PSṬ 2.B66a3–4 y–y Ci'e NVTṬ 158,2–5 (STERN: 161f) z–z Ci'e HBṬĀ 247,22f (STERN: 161f) a–a Ce ?; Ci'e TR 50,13f (STERN: 161f)

---

4 viśeṣaṇa ekasya em. : viśeṣaṇe ekasya BC : viśeṣaṇa iṣyamāne ekasya A 6 nānanvayaḥ AB : nānanvayadoṣaḥ C 7 grub pa ñid T for °sādhanam 10 samuccīyamānāvadhāraṇam BC : samuccīyamānasyāvadhāraṇam A

तस्य साध्यसजातीयवृत्तिनो लिङ्गस्यासति नास्तितां तृतीयं रूपम्। सा च निश्चिता। [b]अन्ते वचनान्निश्चितत्वं त्रिष्वपि रूपेषु द्रष्टव्यम्[b]। अर्थान्तरस्वभावयोः प्रभवतन्मात्रानुबन्धसिद्धौ कारणभावानुपलब्ध्या ग्राह्यविषयया सिद्धा। नेतरयेति यावत्। अनुपलब्धावपि विपर्यये प्रत्यक्षवृत्तिर्व्यतिरेकनिश्चयः ॥

C20a [c]तत्तुल्य एवास्तीति व्यतिरेके सिद्धे[d]ऽसति नास्तिताभिधानमसत्येव नास्तिता नान्यत्र न विरुद्ध इति नियमार्थम्[c][d] इत्याह। तत्रासम्भवादेव नान्यधर्मवृत्तिनिषेधाशङ्का। विरुद्धनिषेधेऽपि तत्रैव निषेधे दोषः स्यात्। न च तत्तुल्य एव वृत्तिरित्यतत्तुल्यो विरुद्ध एव। येन तत एव व्यतिरेकादग्निरौष्ण्यं न गमयेत्। किं तर्हि तत्तुल्यव्यतिरेकोऽपि। तेनायमदोष इत्यवाच्यमेव तृतीयं रूपं स्यात्। प्रयोगदर्शनार्थत्वाददोषः – [e]अन्वयव्यतिरेकयोर्निश्चितव्याप्तिकमेकमपि रूपं प्रयुक्तमर्थापत्त्या द्वितीयं गमयतीति। अत एकस्य प्रयोगः स्यादिति[e] ॥

(Margin: B17a, A17a)

---

b–b Ci' NAVṬ 52,25; Ci'e TR 50,24   c–c Cie HBṬ 13,20–24; PVSVṬ 14,10–12; TR 50,23   d–d Ce PSV on PS 2.5 (p. 455,18–456,2) (cf. STEINKELLNER 1979 : n.81)   e–e Ci' PSṬ 2.B66a6–7; Ci'e TR 51,7–9 (Yaita, letter 3.2.1990; YAITA 1991: 126; STERN: 162)

---

1 tasya sādhyasajātīya° A : tasya sādhyatajjātīya° C : tasyāsādhyatajjātīya° B ◦ gtan tshigs T for liṅgasya ◦ nāstitā AC : nāsti B 3f khyab par byed pa'i ṅo bo T for bhāva 5 °vṛttir AC : °vṛttir eva B 9 ity atattulyo AC : iti tattulyo B 11 ity BC : evety A ◦ tṛtīyaṃ AC : tṛtīya° B 13 dvitīyaṃ AB : dvitīyaṃ rūpaṃ C ◦ gamayatīty BC : gamayaty A ◦ ata A (T) : om. BC 14 iti n.e. T

[f]ननु श्रावणत्वं व्यतिरेक्यप्यगमकम्। न अव्यतिरेकात्। न हि श्रावणत्वं कुतश्चिद्व्यतिरिच्यते सन्देहसाधनात्।[f] व्यतिरेकिणश्च सन्देहायोगात्कृतकत्वादिवानित्यत्वे वस्तुधर्मस्य[4] सर्ववस्तुनो व्यावृत्तिविरोधात्। वृत्तिशङ्कयैव ततः संशयः। अन्वयस्तु न दृष्ट इति व्यतिरेकी कथ्यते। न चैवंविधो व्यतिरेको गमकः। यस्तु गमकः [5]स संवर्णित एव।[g] स च नासत्यन्वये शक्यो दर्शयितुम् तद्भावहेतुभावयोर्दर्शनसाधनत्वात्॥

[h]द्विरूपं तर्हि लिङ्गम्। न अन्वयव्यतिरेकयोः पृथग्रूपत्वात्। [6]ते त्वेकेनापि वाक्येन शक्ये [C]दर्शयितुमिति [i]प्रयोगसमास उच्यते न रूप- C20b
समासः।[i] तथा ह्याह – [j]अर्थापत्त्या वान्यतरेणोभयप्रदर्शनादिति[j][h]॥

[k]नासति नास्तितासिद्धिः[7] [l]असतो ह्यधिकरणत्वाद्ययोगादित्यपरः[k][l]। पशवोऽपि हि तावद्यदयुक्तं पश्यन्ति न तदैव तदाचरन्ति। सोऽयं पशोरपि पशुः। महतो[B]ऽपि महीयसो यदवमन्यत इति किम्[A]- B17b

---

[f–f] Cf. PVSV 19,12–14 [g] Cf. 52,1–5 [h–h] Ci' PSṬ 2.B66a7–66b1 [i–i] Cf. DhPr 96,27f [j–j] Ce NMu$_K$ 4: 72; Ci PVSV 18,17 [k–k] Cee NV 52,17f (cf. STEINKELLNER 1979: n.93); Ci'e PSṬ 2.B66b1 [l–l] Ci'e TR 52,9 (Yaita, letter 3.2.1990; YAITA 1991: 126; STERN: 162)

---

[1] vyatireky apy BC : vyatireke py A ◦ go bar byed pa ñid ma yin no T for agamakam [2] °sādhanāt AB : °sādhanatvāt C [3] med pa'i phyir T for ayogāt ◦ °tvād ivānityatve AB : °tvādivan nityatve C [6] saṃvarṇṇita BC : saṃvantita A ◦ eva n.e. T [11] °tvādyayogād AB : °tvāyogād C; n.e. T for °tva° [11f] gźan dag T for aparaḥ [12] pi hi AC : hi B [13] mahato BC, ma‹ha›to A

A17b न्यदनात्मज्ञतायाः। सोऽयं तैरेवार्थव्यतिरेक*समावेशिभिः पदैरसत्सु* व्यवहारायोगं दर्शयन्परं* प्रतिरुणद्धीति व्यक्तमेतद्राजशासनम्। [m]न च स्वयमब्रूवन्परं* बोधयितुमीशो ब्रूवन्वा[2] दोषमिमं परिहर्तुम्[m]। असति हेतोरप्रतिषेधे विधिः* प्राप्तः' अभावव्यतिरेकलक्षणत्वाद*स्य। [n]सैव* तावदसतो न निवृत्तिरिति निवृत्तै*र्निवृत्तिः कथमिष्टा[n]॥

[op]निवृत्त्यभावस्तु वि[3]धिर्वस्तुभावोऽसतोऽपि सन्।
वस्त्वभावस्तु नास्तीति पश्य वान्ध्य*विजृम्भितम्[p]॥ (k.15)

निवृत्तिर्यदि तस्मिन्न हेतोर्वृत्तिः किमिष्यते।
सापि न प्रतिषेधोऽयं निवृत्तिः किं निषिध्यते॥ (k.16)

वि[4]धानं प्रतिषेधं च मुक्त्वा शब्दोऽस्ति नापरः।
व्यवहारः स चासत्सु नेति प्राप्तात्र मूकता॥ (k.17)

सतां च न निषेधोऽस्ति सोऽसत्सु च न वर्तते।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः[5]॥ (k.18)

---

m–m R 88,22f (received from Tatsuhiko Shiraishi 25.10.2001 in the Shinshindō Café, Kyoto) n–n Cf. PV 4.222 o–o Ce' PV 4.223–236 p–p J 90,20–21

---

1 ldog pa'i don T for arthavyatireka° ◦ asatsu AC : asatya° B 2 darśayan* paraṃ AB : darśayann aparaṃ C 3 paraṃ em. (R) : aparaṃ BC : parān A 4 vidhiḥ BC : vidheḥ A ◦ °lakṣaṇatvād BC : °lakṣaṇātvād A 5 saiva BC : saivā A ◦ nivṛtteḥ n.e. T 7 blun po yi T for vāndhya°

देशकालनिषेधश्चेद्यथास्ति स निषिध्यते। C21a
न तथा न यथा सोऽस्ति तथापि न निषिध्यते॥ (k.19)

तस्मादाश्रित्य शब्दार्थं भावाभावसमाश्रयम्।
अबाह्याश्रयमत्रेष्टं सर्वं विधिनिषेधनम्॥ (k.20)

ताभ्यां स धर्मी सम्बद्धः ख्यात्यभावेऽपि तादृशः।
शब्दप्रवृत्तेरस्तीति सोऽपीष्टो व्यवहारभाक्॥ (k.21)

अन्यथा स्यात्पदार्थानां विधानप्रतिषेधने।
एकधर्मस्य सर्वात्मविधानप्रतिषेधनम्॥ (k.22)

अनानात्मतया भेदे नानाविधिनिषेधवत्।
एकधर्मिण्यसंहारो विधानप्रतिषेधयोः॥ (k.23)

एकं धर्मिणमुद्दिश्य नानाधर्मसमाश्रयम्। B18a
विधावेकस्य तद्राजमिवान्येषामुपेक्षकम्॥ (k.24)

निषेधे तद्विविक्तं च तदन्येषामपेक्षकम्। A18a
व्यवहारमसत्यार्थं प्रकल्पयति धीर्यथा॥ (k.25)

तं तथैवाविकल्प्यार्थभेदाश्रयमुपागताः।
अनादिवासनोद्भूतं बाधन्तेऽर्थं न लौकिकम्॥ (k.26)

तत्फलोऽतत्फलश्चार्थो भिन्न एकस्ततस्ततः।
तैस्तैरुपप्लवैर्नीतंसञ्चयापचयैरिव॥ (k.27)

---

2 na yathā AC : om. B   15 taṃ B : tat AC ∘ °kalpyārtha° AC : °kalpyātva° B   17 °phalo AB : °palo C ∘ ’tatphalaś AC : om. B   18 nīta° AC : nītaḥ B

अतद्वानपि सम्बन्धात्कुतश्चिदुपनीयते*।
दृष्टिं भेदाश्रयैस्तेऽपि तस्मादज्ञातविप्लवाः[o]॥ (k.28)

इत्यन्तरश्लोकाः ॥

[3]एतल्लक्षणा

ऽनुपलम्भात्मकार्याख्या हेतवस्त्रयः[m]॥ (k.9'cd)

C21b एव। [q]अनुपलब्धिः स्वभावः कार्यं चेति त्रीण्येव* लिङ्गानि[q]। [rs]यथा प्रदेशविशेषे क्वचिन्न* घट उपलब्धिलक्षणप्राप्त[4]स्यानुपलब्धेः। यदि हि* स्यात्। उपलभ्यसत्त्व एव स्यान्नान्यथेति*। वृक्षोऽयं शिंशपात्वात्। अग्निरत्र धूमात्*। अत्र द्वौ वस्तुसाधनावेकः प्रतिषेधहेतुः[s]॥

स्वभावप्रतिबन्धे [5]हि सत्यर्थोऽर्थं न व्यभिचरति। स च तदात्मत्वात्*॥

तदात्मत्वे साध्यसाधनभेदाभाव* इति चेत्। न*। धर्मभेदपरिकल्पनात्। तथा चाह – [t]सर्व एवायमनुमानानुमेयव्यवहारो* बुद्ध्यारूढेन[6]

[q–q] Ci'e NB 2,10–11 [r–r] Ce'e PVSV 2,15–3,3 [s–s] Ci'e NB 2.12,16–18 [t–t] Ce Dignāga's Hetumukha (cf. FRAUWALLNER 1959: 164, cf. 103f)

[1] upanīyate AB : anunīyate C [6] eva n.e. T [7] kvacin na A (PVSV) : na kvacid BC ◦ yadi hi A : hi BC [8] iti n.e. T [9] źes bya ba add. T [10f] tad-ātmatvāt AC : tādātmyāt B [12] °bhedābhāva BC : °bhedobhāva A ◦ na BC : om. A [13] eva n.e. T ◦ evāyam anumānānumeya° BC : evāya‹m a›numānānumeya° A

धर्मधर्मिन्यायेनेति। धर्मधर्मितया भेदो बुद्धिपरिकल्पितो नार्थोऽपि विकल्पभेदानां स्वतन्त्राणामनर्थाश्रयत्वात्। तत्कल्पितविषयादर्थप्रतीतावनर्थप्रतिलम्भः स्यात्।

सर्वभावाः स्वभावेन स्वस्वभावव्यवस्थितेः।
स्वभावपरभावाभ्यां यस्माद्व्यावृत्तिभागिनः॥ (k.29) B18b

तस्माद्यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः॥ (k.30) A18b

तस्माद्यो येन धर्मेण विशेषः सम्प्रतीयते।
न स शक्यस्ततोऽन्येन तेन भिन्ना व्यवस्थितिः॥ (k.31)

इत्यन्तरश्लोकाः॥

कार्यस्यापि स्वभावप्रतिबन्धः तत्स्वभावस्य तदुत्पत्तेरिति॥

एतौ द्वावनुमेयप्रत्ययौ साक्षादनुत्पत्तेरतत्प्रतिभासित्वेऽपि तदुत्पत्तेस्तदव्यभिचारिणाविति प्रमाणं प्रत्यक्षवत्॥ C22a

अनुसत्तानिश्चयफलोऽनुपलम्भः (k.32a-b')

u–u Ce' PV 1.40–42 v–v Cf. Lindtner 1984: 165

1 bye brag T (cf. °bhedene° PVSV) for °nyāyene° ABC 2 blo T for vikalpa° ◦ °tvāt BC : °āt A ◦ tatkalpita° A : kalpita° B : tatparikalpita° C 3 kho nar add. T 5 mthun phyogs T for svabhāva 7 °bhedāḥ BC : °bhedoḥ A 11 iti n.e. T 12 °pratibhāsitve A : °pratibhāsatve B : °svabhāvatve C 12f tadutpattes AC : dutpattes B

असद्व्यवहारप्रवर्तनफलोऽनुपलम्भस्तदव्यभिचारी' सिद्धे व्यवहारे सतो विषयस्याव्यभिचारात्॥

[w]अनुपलब्धेर्लिङ्गादसत्तायां साध्यायामुपलब्धेरभावोऽप्यन्ययानुपलब्ध्या साध्यत इत्यनवस्थानादप्रतिपत्तिः स्यात्। अथोपलब्ध्यभावो विनानुपलब्ध्या स्यात्' तथा सत्ताऽभावोऽपि स्यादित्यपार्थिकानुपलब्धिः। अथान्योपलब्ध्याऽनुपलब्धिसिद्धिरिति प्रत्यक्षसिद्धा नानुपलब्धेः। तथान्यसत्तयाऽसत्ता किं न सिध्यति। यदा पुनरेवंविधानुपलब्धिरेवासतामसत्ता' तदा सिद्धेन विषयेण विषयिणोऽसज्ज्ञानशब्दव्यवहारान्प्रतिपद्यते प्रतिपादयति च' विषयप्रदर्शनेन समये प्रवर्तनात्' यथा – [x]गौरयं सास्नादिसमुदायात्मकत्वादिति। B19a तथा च दृष्टान्तासिद्धिचोदनापि प्रतिव्यूढा[x]' विषयप्रतिपत्तावप्यप्रतिपन्नविषयिणां दर्शनात्[w]॥

भावव्यतिरेको ह्यभावः' अनुपलब्धिरुपलब्धेः। सा कथमसत्ता भावस्य' उपलम्भनिवृत्त्या वा कथमभावः' कार्यव्यतिरेकेऽपि का-

---

w–w Ce'e PVSV 4,15–5,1 x–x Ce'e TR 58,3f

---

1 tadavya° AB : tadvya° C 2 °āvyabhicārāt C : °āvyabhicāraḥ B, °āvyabhicā.. A 3 anupalabdher BC : anupalabdhor A ◦ upalabdher AB : upalabdher apy C 4 atho° AC : anyatho° B 5 ity AC : om. B 7 mi dmigs pa ni ma yin T for nānupalabdheḥ 8 mūḍhasya in the lower margin of A is a gloss after viṣayeṇa (cf. mohād PVSV 4,21) 9 'sat*jjñāna° C : 'saṃjjñāna° AB; asat° n.e. T 11 apy AB : om. C 13 sā n.e. T

रणाभावासिद्धेः। [A] उपलम्भनिबन्धना हि तादृशां सत्ताप्रज्ञप्तिरुपलब्धियोग्यस्वभाव[y]स्यान्[C]यहेतुसाकल्ये तदव्यभिचाराच्चोपलम्भः सत्तो[y]च्यते। सामग्रीपरिणामापेक्षत्वात्स्याद्व्यभिचारोऽपीति चेत्' [z]न' कार्यकालेऽभावप्रतिपत्तेः[z]' अन्योपलम्भे तदनुपलम्भासिद्धेः। प्रभाववतोऽधिष्ठानात्सतोऽप्यनुपलब्धिरिति चेत्' न' विषयेन्द्रिययोरेकस्य द्वयोर्वानन्यथात्वेऽयोगादधिष्ठानस्य। तत्संस्कारे तु स्यादनुपलम्भः। तदापि तथाविधेन्द्रियग्राह्याभावोऽस्त्येव। तस्माज्ज्ञानं तद्योग्यतां वास्य सत्ता' [a]तद्व्यतिरेकोऽनुपलब्धिरसत्ता[a]। तया विषयी साध्यते। एतेनेह कारणस्य कार्यव्यभिचारः प्रत्युक्तः। अत्राप्यनुपलब्ध्या तन्निमित्तः सिद्धो व्यवहारोऽपि तन्निमित्तसत्तया साध्यते' अन्यनैमित्तिकवत्॥ A19a C22b

सैव तावदनुपलब्धिः कथं सिद्धेति चेत्' एतदुत्तरत्र[b] वक्ष्यामः॥

[c]स चायमनुपलम्भश्

---

y–y PVSVṬ 32,24f (STERN: 162) z–z VNṬ 20,23 a–a Cie PVSVṬ 32,25 (STERN: 162) b Cf. PVin 3.47ab (f. 304a6; cf. STEINKELLNER 1979: n. 146) c–c Ce'e PVSV 5,6 + PV 1.4d

---

1 rnam par gźag pa T for prajñaptiḥ 1f dmigs par ruṅ ba'i raṅ bźin yod pa T for upalabdhiyogyasvabhāvasya 3 api n.e. T 5f gaṅ yaṅ ruṅ ba źig T for ekasya 6 ñid add. T 8 'drer ruṅ ba ñid T for tadyogyatā ◦ vāsya AB : vā C; daṅ T for vā ◦ tayā BC : tayā ca A (add. in margin, cf. des kyaṅ T) 9 iha n.e. T ◦ kāraṇasya BC : °ā?kāraṇasya A ◦ yaṅ add. T 10 °nimittaḥ AC : °nimittā B ◦ kyaṅ add. T 11 anyanaimittikavat C (anyanaimittisattayā sādhyate | anyanaimittikavat B) : anyanimittikavat A 12 siddheti AB : siddher iti C ◦ vakṣyāmaḥ BC : vakṣāmaḥ A

[d]चतुर्विधः[d]। (k.32'b)

प्रवृत्तिभेदात्[c]। [e]यावान्कश्चित्प्रतिषेधः स सर्वोऽनुपलब्धेः। तथा हि स द्विधा क्रियते[e] कस्यचिद्विधिना* प्रतिषेधेन* वा ॥

विधौ* विरुद्धो वा विधीयेताविरुद्धो* वा। अविरुद्धस्यापि* सहभाव- [B19b] विरोधाभावादप्रतिषेधो विरुद्धस्याप्यनुपलब्धिमन्तरेण विरोधाप्रति- [C23a] पत्तिः। तथा [f]ह्यपर्यन्त*कारणस्य भवतोऽन्यभावेऽभावाद्विरोधगतिः[f]। स चा*नुपलब्धेः। [g]अन्योन्यव्यतिरेकस्थितलक्षणता वा विरोधो नि- [A19b] त्यानित्यत्ववत्*[g]। तत्राप्येकोपलब्ध्यान्यानुपलब्धिरेवो*च्यते' अन्यथा *ह्यनिषिद्धोपलब्धेरभावासिद्धेः ॥

एकनिषेधेनान्याभावसाधने सिद्धैवा*नुपलब्धिः' निषेधस्यानुपलब्धिरूपत्वात्। तत्राप्यर्थान्तरनिषेधे साध्ये कार्यकारणयोरनुभयस्य* वा निषेधो हेतुः। तत्राप्य*नुभयस्याप्रतिबन्धात्तदभावे*ऽन्याभावो न युक्तः ॥

---

d–d Cf. LINDTNER 1984: 165 e–e Ce'e PVSV 5,9–21 f–f Ci'e NB 3.73 g–g Ci'e NB 3.75

---

3 vidhinā BC : vidhenā A ∘ pratiṣedhena C (cf. vidhipratiṣedhābhyām below 62,1) : niṣedhena AB 4 vidhau AC : vidho B ∘ vā vidhīyetāviru° A : vidheyo 'viru° B : vā vidheyatāviru° C ∘ api n.e. T 6 aparyanta° em. : aparyānta° ABC 7 sa cānu° AC : sattānu° B 7f nityānityatvavat AC : nitya‹ni›vat B 8 eva n.e. T 8f anyathā hy a° BC : anyathā° A 10 siddhaivānu° AC : siddhaivāvānu° B 11 anubhayasya AB : anubhavasya C 12 api n.e. T ∘ tadabhāve AB : tadbhāve C

कार्यानुपलब्धावपि नावश्यं कारणानि तद्वन्ति भवन्तीति कुतस्तदभावः[e]। शक्तं कारणं नाशक्तम्। न च शक्तिः केनचित्प्रतिबन्धुं शक्यते[3]। अन्त्यावस्थायां परिणामाभावात् क्षणस्याविवेकात्। कार्योत्पत्तिविगुणोत्पादनलक्षणत्वात्प्रतिबन्धस्य। अन्यथाऽकिञ्चित्करस्याप्रतिबन्धात्। भवत्येव तादृशस्य[4] कारणस्य कार्यविवेकादभावगतिः। [h]यथा – नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति धूमाभावादिति[h]। [i]तत्कार्यं हेतुव्याप्त्यव्यतिरेकात्तत्स्वभावाविशिष्टमिति[5] तदनुपलम्भः स्वभावानुपलम्भ एवोक्तः[i]। [j]तथा तद्विरुद्धोपलम्भः। यथा – नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्त्यग्नेरिति[j] कारणद्रव्यसामान्यमभिप्रेत्य कार्यानुपलम्भोऽगमक[6] उच्यते। यथा – [B] ना[C]- B20a C23b
ग्निरत्र धूमाभावादिति। [k]कारणानुपलब्धिरभावं गमयति। स्वभावानुपलब्धिस्तु स्वयमसत्त्वैव। तत्र केवलं विषयी साध्यतेऽभावो वा तद्भावव्यापिनः [7]कार्यस्याभावेन। यदापि व्यापकधर्मानुपलब्ध्या व्याप्याभावमाह। तदाप्यभाव एव[k]॥

---

h–h Ci' NB 2.32 i–i PVA 638,28f; ĪPVV III 225,6–8 (STERN: 162) j–j Ci'e NB 2.37
k–k Ce'e PVSV 5,22–23

---

1 °ānupa° AB : °āvupa° C 2 rgyu add. T ◦ kenacit AB : om.C (n.e. T) 2f nus pa la (em. [cf. PVinṬ₁ 249b4] : las DNP) ni gegs bya bar yaṅ mi gnas te T for na ca śaktiḥ kenacit pratibandhuṃ śakyate 3 śakyate AB : śakyante C ◦ pariṇāmā° AC : parimā° B 8 °upalambhaḥ svabhāvānupalambha AC : °upalambha B ◦ eva n.e. T 9 nehā° BC : nātrā° A 10 'gamaka ucyate AC : '{ma}gamaka ucyate | maka ucyate B 13 api n.e. T

तदेवं विधिप्रतिषेधाभ्यां कस्यचिन्निषेधे सर्वगमकानामनुपलब्धी रूपम्। नापरः प्रतिषेधहेतुः ॥

A20a सेयं प्रतिषेधविषयानुपलब्धिः प्रयोगभेदेन चतुर्धा भवति। विरुद्धसिद्ध्या' यथा – न शीतस्पर्शोऽत्राग्नेरिति। एतेन व्यापकविरुद्धसिद्धिरुक्ता वेदितव्या' यथा – न तुषारस्पर्शोऽत्राग्नेरिति। विरुद्धकार्यसिद्ध्या' यथा – न शीतस्पर्शोऽत्र धूमादिति। हेत्वसिद्ध्या' यथा – न धूमोऽत्रानग्नेरिति। स्वभावासिद्ध्या' यथा – नात्र धूमोऽनुपलब्धेरिति। एतेन व्यापकस्वभावासिद्धिरुक्ता वेदितव्या' यथा – नात्र शिंशपा वृक्षाभावादिति। सर्वत्र चास्यामभावव्यवहारसाधन्यामनुपलब्धौ दृश्यात्मनामेव तेषां तद्विरुद्धानां च सन्निहितान्योपलम्भकारणादसिद्धिः सिद्धिश्च वेदितव्या' अन्येषां हेतुफलभावाभावविरोधासिद्धेः ॥

---

l–l Ce'e PVSV 5,25–6,9 m–m Ci'e NB 2.45–46

---

[3] caturdhā C : caturvidhā AB [4] agner iti C (me yod pa'i phyir ro źes bya ba T) : agneḥ AB [5] yaṅ add. T ∘ agner iti em. (me yod pa'i phyir ro źes bya ba T) : agneḥ ABC [6] dhūmād iti C (du ba yod pa'i phyir ro źes bya ba T) : dhūmāt AB [7] °ānagner iti em. (me med pa'i phyir ro źes bya ba T) : °ānagneḥ ABC ∘ svabhāvāsiddhyā AC : svabhāvaṃ siddhyā B [7f] 'nupalabdher iti em. (cf. T) : 'nupalabdheḥ ABC; dmigs pa'i rig byar 'gyur pa las mi dmigs pa'i phyir gl. T [8] yaṅ add. T ∘ veditavyā n.e. T [9] °ābhāvād iti C (med pa'i phyir źes bya ba T) : °ābhāvāt AB [10f] °kāraṇā<d a>siddhiḥ siddhiś em. (rgyu … las ma grub pa daṅ grub pa T) : °kāraṇā'siddhiḥ siddhiś B : °kāraṇāsiddhiḥ siddhiś A : °kāraṇāsiddhir asiddhiś C [11] anyeṣāṃ B : anyeṣāṃ tu AC (gźan dag la ni T) ∘ °hetuphalabhāvā° BC : °hetu{bhāla}bhāvā° A

[n]दृश्यस्य दर्शनाभावकारणासम्भवे सति।
भावस्यानुपलब्धस्य भावाभावः प्रतीयते[n]॥ (k.33)

इति सङ्ग्रहश्लोकः॥

[o]यदि विरुद्धकार्योपलब्ध्याप्यभावसिद्धिः, तत्कारणोपलब्ध्या किं C24a न सिध्यति। न, तद्व्यभिचारात्, यथा – न शीतस्पर्शोऽत्र काष्ठादि- B20b ति[o]। कारणानां कार्यारम्भानियमान्नावश्यं शीतबाधकोऽग्निः, यतस्तदभावो गम्येत। अन्त्यस्यावस्थाविशेषस्याव्यभिचार इति चेत्, न, ततः कर्योत्पत्तेरक्षेपात्। आ अन्त्यक्षणोत्पत्तेः प्रतिबन्धः सम्भाव्यते, अन्त्यक्षणेऽप्रतिबन्धः। तल्लिङ्गदर्शनात्सम्बन्धस्मृत्यपेक्षिणोऽनुमेयप्रतिपत्तौ तदुत्पत्तेः प्राक्कार्यमेवान्त्यक्षणानन्तरत्वादुत्पन्नं प्रत्यक्षीभवति। न चाप्रत्यक्षे कार्ये कारणभावगतिः, यतः कारनात्तत्प्रतीयेत। तस्मान्न कारणात्कार्यसिद्धिः॥ A20b

[p]निमित्तयोः पुनर्विरोधे गमिकैव, यथा – नास्य रोमहर्षादिविशेषाः सन्ति सन्निहितदहनविशेषत्वात्[p]। रोमहर्षादिविशेषविरुद्धस्य

---

n–n Ce' PV 1.203 (cf. LINDTNER 1984: 166) o–o Ce' PVSV 6,9–13 (with PV 1. 5'd)
p–p Ce' PVSV 6,13–15

---

4 °opalabdhyāpy AC : °opabdhyāpy B 6 °niyamān BC : °niyāmān A ∘ °bādhako C : °bādhano AB 8 ā antya° BC, ā 'ntya° A 9 antyakṣaṇe 'prati° em. : antyakṣaṇo 'prati° AC, antakṣaṇo aprati° B ∘ 'gegs med pas rtags de for 'pratibandhaḥ | tal liṅga° ABC 10 utpatteḥ n.e. T ∘ antya° AC : anta° B 13 nimittayoḥ BC : nittiyoḥ A ∘ romaharṣādi° C : romarharṣādi° A : romaharṣā° B 14 santi BC : om. A ∘ °dahana° BC : °dahara° A

परितापस्य हेतोरग्नेः शीतेन विरोधाच्छीतविच्छेदे तत्कार्यस्याप्यभावं* इति। [q]एतेन तत्कार्यादपि तद्विरुद्ध*कार्याभावगतिरुक्ता वेदितव्या' यथा – न रोमहर्षादिविशेषयुक्तपुरुषवानयं प्रदेशो* धूमादिति। इयं च हेत्वसिद्ध्यैव तद्विरुद्धसिद्धिः प्रागेव निर्दिष्टेतीयं प्रयोगभेदाद्दशविधानुपलब्धिः[q]॥

[r]इष्टं विरुद्धकार्येऽपि देशकालाद्यपेक्षणम्।
अन्यथा व्यभिचारि स्याद्भस्मेवाशीतसाधने[r]॥ (k.34)

C24b इत्यन्तरश्लोकः ॥

[s]नासत्तानिश्चयो विप्रकर्षिणाम्[s]। त्रिविधा हि विप्रकर्षिणो* देशका-
B21a लस्वभावविप्रकर्षेन तेष्वनुपलम्भोऽभावं* गमयति* ॥

सदवश्यं केनचिदुपलभ्यते व्यतीतासम्प्राप्तोपलम्भं* वा। तत्कथं नानुपलम्भादभावः। न' सर्वोपलम्भनिवृत्तेरत्रालिङ्गत्वात्' आत्मपरयोरप्रतिपत्तेः। तस्मादयमात्मोपलम्भनिवृत्तिमेव प्रमाणयन्*प्रतिक्षिपति। सा विप्रकृष्टेष्वप्य*स्ति' न च ते न सन्त्येव॥

---

q–q Ce'e PVSV 6,15–18 r–r Ce' PV 1.6 s–s HBṬ 147,10f; ĪPVV I 202,15; J 65,18 (STERN: 162)

---

1 źes bya ba add. T 1f °syāpy abhāva C : °syābhāva AB 2 tadviruddha° em. (de daṅ 'gal ba'i T, PVSV) : viruddha° ABC 3 phyogs kyi bye brag T for pradeśaḥ 9 °karṣiṇo AC : °karṣaṇo B 10 abhāvam n.e. T ◦ gamayati AB : gayati C 11 °opalambhaṃ BC : °opalabham A 13 pramāṇayan BC : pramāṇayat A 14 apy C (yaṅ T) : om. AB

तत्रापि सति प्रत्यक्षानुमानागमानामेकस्य वृत्तिरिति चेत्। न। शास्त्रस्य क्वचिदनधिकारात्। ^t शास्त्रं हि प्रवर्तमानं पुरुषार्थसाधनं कञ्चिदुपायमाश्रित्य प्रवर्तते*। अन्यथासम्बद्धप्रलापस्याप्रामाण्यात्। तत्र च प्रकरणे बहवो ऽर्था नावश्यं निर्देश्याः। यथा प्रत्यात्मनि- A21a
यताः काश्चन पुरुषाणां चेतोवृत्तयोऽनियतनिमित्तभाविन्यो देशकालव्यवहिता वा प्रकरणानुपयोगिनो द्रव्यविशेषाः। न तान्शास्त्रं विषयीकरोति। न च तेषां* तथाविप्रकृष्टानां स्वसामर्थ्योपधाना*ज्ज्ञानोत्पादनशक्तिः। न चावश्यमेषां कार्योपलम्भो येनानुमीयेरन्। न च ते प्रमाणत्रयनिवृत्तावपि न सन्तीति शक्यन्ते* व्यवसातुम्^t॥

^u योऽपि ज्ञापकाभावादतीन्द्रियः प्रतिक्षिप्यतेऽर्थः स्वभावविशेषो C25a
वा। यथा – नास्ति विरक्तं चेतो देवताविशेषो वा। नास्ति दानहिंसादिविरति*चेतनानामभ्युदयहेतुतेति। प्रत्यक्षेऽप्यर्थे फलस्यानन्तर्याभावादतत्फलसाधर्म्यात्तद्विपर्यास एषः। व्यवहितानाम*पि हि हेतोः फलानामुत्पत्तिदर्शनान् मूषिकालर्कविषविकारवत्। तद्भाववि- B21b
रोधाभावादत्रानुपलब्धिमात्रमप्रमाणम्। भावे* किं प्रमाणमिति चेत्। अत एव संशयोऽस्तु। भवेद्वा प्रमाणमित्यप्रतिक्षेपः। तदत्र केषाञ्चि-

---

t–t Ce'e PVSV 102,2–11   u–u Ce'e PVSV 103,2–14

---

3 pravarttate AC : vartteta B 7 teṣām n.e. T 7f °opadhānāj C : °opadhānā A : °opadhānām B 9 śakyante BC : śakṛnte A ◦ vyavasātum em. : ’vyavasātuṃ BC : vyavaśāntaṃ A 12 °virati° AB : °nivṛtti° C 13 tad° n.e. T ◦ °hitānām AB : °hitām C 15 de ’byuṅ ba la T for bhāve

त्स्वभावानामर्थानां वा दर्शनपाटवाभावात्कारणानां कार्योत्पादननियमाभावाच्च भवेज्ज्ञापकासिद्धिः। नेयता तदभावः। पुनः पर्यायेण केषाञ्चिदभिव्यक्तेः[u]॥

[v]नापि शब्दा यथाभावं वर्तन्ते' यतस्तेभ्योऽर्थप्रकृतिर्निश्चीयेत। ते हि वक्तुर्विवक्षावृत्तय इति तन्नान्तरीयकास्तामेव गमयेयुः। न च
A21b पुरुषेच्छाः सर्वा यथार्थभाविन्यः। न च तदप्रतिबद्धस्वभावो भावो ऽन्यं गमयति[v]॥

[w x]यथार्थदर्शनादिगुणयुक्तः पुरुष आप्तः' तत्प्रणीत आगमोऽविसम्वादीति[x] चेत्'

[y]इष्टोऽयमर्थः शक्येत ज्ञातुं सोऽतिशयो यदि[y]॥ (k.32cd)

सर्व एवागममनागमं वा प्रवृत्तिकामोऽन्वेषते प्रेक्षापूर्वकारी' न
C25b व्यसनेन[w]। [z]तस्य पुरुषपरीक्षया प्रवृत्तावप्रवृत्तिरेव' तथाभूतस्य ज्ञातुमशक्यत्वात्। नानिष्टेः' तादृशामवितथाभिधानात्। तथा हि नान्यगुणदोषनिश्चये लिङ्गमस्ति। ते हि चेतोधर्मत्वेनातीन्द्रियत्वात्स्व-

---

v–v Ce' PVSV 107,22–25 w–w Ce'e PVSV 109,24–110,4 (with PV 1.220cd) x–x Re NBh on NSū 1.1.7 and 2.1.68 (p. 96,16f); cf. NV 257,20–258,2 y–y Ce' PV 1.220cd (cf. Lindtner 1984 : 165) z–z Ce'e PVSV 110,6–15 (with PV 1.221)

---

1 svabhāvānām arthānāṃ vā AB : arthānāṃ svabhāvānāṃ vā C ∘ °pāṭavā° B : °pāṭāvā° AC 2 neyatā BC : neyitā A ∘ de med par ṅes pa ni T for tadabhāvaḥ 5 iti AB : eveti C ∘ tannānta° AB : nānta° C 11 na AB (cf. 48,5) : na tu C 12 eva n.e. T 13 nāniṣṭeḥ AC : nāniṣṭoḥ B ∘ avitathā° AB : aviparītā° C 14 °ātīndriyatvāt B (dbaṅ po las 'das pa'i phyir T) : °ātīndriyāḥ A (PVSV) : °āstīndriyāḥ C

प्रभवकायवाग्व्यवहारानुमेयाः स्युः। व्यवहाराश्च प्रायशो बुद्धिपूर्वमन्यथापि* कर्तुं शक्यन्ते' पुरुषेच्छावृत्तित्वात्तेषां च चित्रा*भिसन्धित्वात्। तदयं लिङ्गसङ्करात्कथमनिश्चिन्वन्प्रतिपद्येत* ॥

[a]मा भूत्पुरुषाश्रयं वचनमागमः' प्रणेतुर्दुरन्वयत्वात्।[a] [b]अपौरुषेय- [B22a] मवितथं स्यात्।[b] न' तस्यायोगादर्थाभिधाने पुरुषोपदेशापेक्षत्वाच्च। उपलम्भयोग्यायोग्यात्मनोः प्राप्तिपरित्यागयोः स्वभावान्तरो*त्पत्तिहानिनान्तरीयकत्वात्' नित्यं* तदात्मतायां कदाचिदुपलम्भानुपलम्भाभावप्रसङ्गात्। नापि परापेक्षा' तस्य तत्राकिञ्चित्करत्वात्' [c]अन्यकरणे* तस्येति सम्बन्धायोगात्।[c] उपकारस्य तत्सम्बन्धे* कः सम्बन्धोऽनुपकार्योपकारकयोः*। आधाराधेयभावश्चेत्' सोऽपि तदात्मानुपकारे न सिध्यति। परात्मनि तुल्यः पर्यनुयोगोऽनवस्था [A22a] च। जन्यजनकभावे* सो*ऽनपेक्षस्य* नित्यं स्यात्। अपेक्षायां च पूर्ववत्प्रसङ्गः। तस्मात्कादाचित्कः शब्दस्योपलम्भयोग्य आत्मा' स च* [C26a]

[a–a] Ce' PVSV 112,6f [b–b] Ce'e PV 1.226c [c–c] Cf. PVSV 113,20f

---

2 api n.e. T ◦ citrā° A (PVSV) : vicitrā° BC 3 pratipadyet{ā}a A : pratipadyet BC 6 antara n.e. T 7 nityam BC : nityām A 9 °karaṇe BC : °kāraṇe A ◦ yaṅ add. T 10 nupakāryopakārakayoḥ AC : 'nupakāryānupakārakayoḥ B 12 °bhāve A (dṅos po yin na T) : °bhāvaś cet BC ◦ so AC : | sā B ◦ ltos pa med pa'i phyir T for anapekṣasya 13 sa ca BC : sa A

पुरुषव्यापारान्वयव्यतिरे[2]कानुविधायी पौरुषेयः। अन्यथापि[d] नान्तरीयकताभावान्न परात्मनः* प्रतिपत्तिरर्थस्य॥

न हि सत्ता शब्दस्यार्थविशेषे प्रतिबद्धा*' तस्याः सर्वत्राविशेषात्। [e]इन्द्रियविषयवत्[3] परस्परयोग्यता नियामिकेति[e] चेत्' न' तत्राप्येकप्रतिनियमस्य तज्जन्मलक्षणत्वात्तदुपकृतमिन्द्रियं ज्ञानं* जनयतीत्य्' अन्यथानुपकारिणोऽनपेक्षा स्या*द्वि[4]षयान्तरवत्। तेनैव कस्मादुपक्रि-
B22b यत इति चेत्' अत्र वस्तुस्व[B]भावैरुत्तरं वाच्यम्' य* एवं भवन्ति*। तथा हि न यवाङ्कुरः शालिबीजाद्भवति' अपि तु यवबीजात्*। एवं श[5]ब्दानामपि यद्यर्थेभ्यो* जन्म* स्यात्' स्या*द्योग्यतानियमः। तदभावेऽस्येदमिति* न सिध्यति। नाप्यर्थवत्ता। अर्थेभ्यो ज्ञापनेच्छा' तयार्थज्ञापनाय प्रयुज्यन्त इति [6]तैस्तद्वन्तः स्युः* कायविज्ञप्त्यादिवत्। अतदागमेभ्यो न तत्र प्रतीतिराकाशादिव घटादिषु॥

न वै शब्दस्वभावो नियतोऽर्थेषु' यतस्तदुत्पत्तिः*। किं तर्हि ज्ञापनशक्ति*रयमस्यै[7]व प्रतिपादक* इति। सापि तत्र प्रतिबद्धा* भावाभावा-

---

[d] The incomplete manuscript of Dharmottara's Pramāṇaviniścayaṭīkā begins f.65a1 with the pratīka anyathāpi. [e–e] Cf. VP 3.3,29 (cf. STEINKELLNER 1979: n.222)

---

[2] gźan T for parātmanaḥ [3] pratibaddhā BC : pratibandhas A [5] rnam par śes pa T for jñānam [6] 'napekṣā syād AC : 'napekṣāt B [7] ya AC : yaṃ B ◦ bhavanti C : bhavati AB [8] yavabījād B : yavabījād eva AC [9] arthebhyo AC : arth{e}abho B ◦ janma AB : janmaḥ C ◦ syāt syād A : syāt tadā syād C : syād B [10] 'brel pa add. T [11] syuḥ A : om. BC [13] tadutpattiḥ AB : tadutpattiḥ syāt C [14] ṅes pa yin add. T ◦ (nānyasya add. PVinṬ 2.68a2) ◦ pratibaddhā AB : pratibandhā C

भ्यां कार्यतां नातिपतति। तन्मात्रलक्षणत्वादन्येष्वप्यस्याः। तद्व्यतिक्रमे च नियमायोगात्। शक्तेश्चानर्थान्तरत्वात्स एव स्वभावनियमः। C26b A22b अर्थान्तरत्वे ततोऽर्थेषु ज्ञानोत्पत्तिरिति शब्दोऽवाचकः स्यात्तस्येति सम्बन्धश्च न सिध्यति। तस्मात्सर्वथा सर्व एव क्वचिन्नियमः स्वभावभूतः स्वहेतुप्रकृतेर्नियामकस्य [2] जनकतामेव दीपयति॥

न वै नान्तरीयकतया शब्दादर्थप्रतिपत्तिः। अपि तु योग्यतया प्रदीपादिव रूपे। तन्नायं दोषः प्रतिबन्धाभावादप्रतिपादक इति। न। स्वभावतः प्रतिपत्तेरभावात् [3] प्रदीपादिव रूपे। तद्भावाभावयोर्दर्शनादर्शनस्मृत्यपेक्षे हि शब्दलिङ्गे स्वविषयं प्रतिपादयतः। अदर्शनस्मृतिविप्रमोषयोरप्रतिपत्तेः। सन्देहे [4] सन्देहाद्बहुषु दर्शने च। एकत्र द्रष्टुरभावात्। पुनर्दर्शने च भावात्। विशेषान्तरदृष्टावन्यथा प्रयोगे विप- B23a र्ययात्। यथादर्शनप्रतीतेर्दर्शनपरावृत्तौ चार्थान्तरपरिग्रहात् [5]। कलिमार्यादिशब्दानामिव मत्तकालातिशयवर्षोपसर्गादिषु द्रमिडार्यदेशयोः॥

---

[3] śabdo AB : śabde C [4] mi 'grub pa'i phyir T for na sidhyati [4f] 'ga' źig tu ṅes pa'i raṅ bźin de thams cad ni T for sarva eva kvacin niyamaḥ svabhāvabhūtaḥ [5] svahetu{kṛ}kṛter A : svahetuprakṛter B (raṅ gi rgyu'i ṅo bo ñid las byuṅ ba yin pas T) [6] nāntarīya° AC : vāntarīya° B [8] raṅ raṅ gi ṅo bos T for svabhāvataḥ ◦ pradīpād iva rūpe A (gzugs la sgron ma bźin du T) : pradīpādivat B : pradīpād iva C [10] bahuṣu darśane AC : bahuṣv adarśane B [11] ca AB : om. C ◦ bhāvāt AC : bhāvyat B ◦ yaṅ add. T [12] yathādarśana° A : yathādarśanaṃ BC

तस्मादिमे दर्शनमदर्शनं* चापेक्षमाणास्तत्साधनमव्यभिचारमेव प्रतिपादने लिङ्गवदवलम्बन्ते। अनुपदेशादप्रतिपत्तेरुपदेशे च शब्दानामर्थेष्वनावरणात्तदेवं पुरुषेच्छायाः स्वातन्त्र्यं व्यवस्थां विधुरयति*। C27a विस्तरेण चायम*स्माभिर्वादः* प्रमाणवार्त्तिके[f] प्रतिषिद्ध इति नेह प्रतन्यते॥

[g]स्वयं रागादिमान्नार्थं* वेत्ति वेदस्य नान्यतः।
न वेदयति वेदोऽपि वेदार्थस्य कुतो गतिः॥ (k.35)

A23a तेनाग्निहोत्रं जुहुयात्स्वर्गकाम इति श्रुतौ।
खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा॥ (k.36)

प्रसिद्धो लोकवादश्चेत्तत्र कोऽतीन्द्रियार्थदृक्।
अनेकार्थेषु शब्देषु येनार्थोऽयं विवेचितः॥ (k.37)

स्वर्गोर्वश्यादिशब्दश्च दृष्टोऽरूढार्थवाचकः।
शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना[g]॥ (k.38)

अप्रसिद्धार्थयोगस्यं* तत्प्रसिद्धिप्रसाधने।
नासिद्धार्थः स्वयं शक्तस्तुल्यः पर्यनुयोगतः॥ (k.39)

---

[f] Cf. PV 1.227–238 (PVSV 113,8–120,7) [g–g] Ce' PV 1.317–320

---

1 darśanam adarśanaṃ AC : darśanādarśana B 3 anāvaraṇāt AB : anavadhāraṇāt C ◦ vidhurayati ABC (cf. PVSV 165,25) (: vidyayati PVinṬ 2.71a4) 4 cāyam AB : āyam C ◦ vādaḥ AC : om. B 6 nārthaṃ AB : arthaṃ C 14 °yogasya AB : °yogyasya C

[h]प्रसिद्धिश्च नृ[8]णां वादः प्रमाणं स च नेष्यते।
ततश्च भूयोऽर्थगतिः किमेतं*द्विष्टकामितम्॥ (k.40)

अथ प्रसिद्धिमु*ल्लङ्घ्य कल्पने किं* निबन्धनम्।
प्रसिद्धेरप्रमाणत्वात्तद्ग्रहे किं निबन्धनम्॥ (k.41)

[4]उत्पादिता प्रसिद्ध्यैव शङ्का* शब्दार्थनि[B]श्चये। B23b
यस्मान्नानार्थवृत्तित्वं शब्दानां तत्र दृश्यते[h]॥ (k.42)

न युक्तिबाधा यत्रास्ति* तद्ग्राह्यं लौकिकं यदि।
गृह्यते* वातपुत्रीयं किं न [5]युक्त्या न बाधितम्॥ (k.43)

आगमार्थाश्रया युक्तिरत्यक्षेषु न चेतरा।
तदर्थस्याप्रतिष्ठानाद्युक्तेरत्र न सम्भवः॥ (k.44)

[i]अन्यथाऽसम्भवाभावान्नानाशक्तेः स्वयं ध्वनेः।
अवश्यं [6]शङ्कया भाव्यं नियामकम[C]पश्यताम्॥ (k.45) C27b

एष स्थाणुरयं मार्ग इति वक्तीति* कश्चन।
अन्यः स्वयं ब्रवीमीति तयोर्भेदः परीक्ष्यताम्॥ (k.46)

---

h–h Ce' PV 1.321–323 i–i Ce' PV 1.324–329

---

2 etad AC : itad B 3 atha prasiddhim AC : arthaprasiddham B, atha prasiddhaṃ PVinṬ 2.72b4 ◦ kiṃ AB (ci yod T) : na C (PVinṬ 2.74a6, PV 1.322) 5 śaṅkā AC : om. B 7 yatrāsti AB : tatrāsti C 8 gṛhyate C : gṛhyeta AB 13 (: eṣa sthāṇur vvyakty ayaṃ mārgga iti PVinṬ 2.74a2)

सर्वत्र योग्यस्यैकार्थद्योतने नियतिः कुतः ।
ज्ञाता वाऽतीन्द्रियाः केन विवक्षावचनादृते ॥ (k.47)

विवक्षा नियमे हेतुः सङ्केतस्तत्प्रकाशनः ।
अपौरुषेये सा नास्ति तस्य सैकार्थता कुतः ॥ (k.48)

स्वभावनियमेऽन्यत्र न योज्येत तया पुनः ।
A23b सङ्केतश्च निरर्थः स्याद्व्यक्तौ च नियमः कुतः ॥ (k.49)

यत्र स्वातन्त्र्यमिच्छाया नियमो नाम तत्र कः ।
द्योतयेत्तेन सङ्केतो नेष्टामेवास्य योग्यताम् ॥ (k.50)

इत्यन्तरश्लोकाः ॥

एकदेशाविसंवादनमप्यागमलक्षणमाहुः । तद्विपक्षेऽदर्शनमात्राद्व्यभिचारासिद्ध्यानिश्चितार्थम् । ननु प्रयोगसामर्थ्यादेवार्थानुबन्धः सिद्धः शब्दानाम् । असति विषयेऽप्रयोगात् । युक्तमेतत् । किं तु तथा प्रसिद्धावपीच्छाया अनिवारणादन्यथापि लोके व्यवहारो दृष्ट इति संशयः । तस्मान्नागमस्यापि निवृत्तिरर्थाभावं गमयति ॥

[j–j] Ci' PVSVṬ 593,13f (Krasser); cf. PV 1.330 and PVSV 173,16–19 (cf. STEINKELLNER 1979: n.252)

---

1 °syaikā° AC : °syekā° B ◦ niyatiḥ AB (PVSVṬ 604,26!) : niyamaḥ C (PV 1.326) 3 saṅketas AC : saṅketuḥ saṅkettas B 5 °niyame AC : °niyamo B 6 niyamaḥ AC : niyarth?aḥ B 10 tad n.e. T 11 avyabhicāra n.e. T ◦ de'i don ni ma ṅes pa ñid T for aniścitārtham 12 sgra thams cad ni T for śabdānām ◦ don T for viṣaye 13 ñid add. T ◦ api n.e. T 14 ñid add.T

प्रत्यक्षनिवृत्तिरेवानुपलब्धिरभावसाधनी। सकलकारणस्यास्या- B24a
र्थसत्तायामभावासम्भवात्। तत्रार्वाग्दर्शनस्यात्मप्रत्यक्षनिवृत्तिप्र-
माणयतस्तद्ग्रहणयोग्यप्रतिषेधो युक्तः। न च सर्वमेवमित्यप्रतिषेधः
सर्वत्र॥

प्रवृत्तेर्बुद्धिपूर्वत्वात् सोऽप्रवृत्तिफलो मतः। C28a

सोऽयं विप्रकृष्टविषयः प्रत्यक्षानुमानाभावः सज्ज्ञानशब्दव्यवहारप्रतिषेधफलः। उपलब्धिपूर्वकत्वात्तेषाम्॥

अन्यः प्रवर्तनफलस्तन्निमित्तस्य दर्शनात्॥ (k.51)

पूर्वकः पुनरनुपलम्भोऽसज्ज्ञानशब्दव्यवहारप्रवर्तनफलोऽपि। विष-
यदर्शनेन प्रसिद्धस्य व्यवहारस्य साधनात्। द्वयोरप्यनुपलब्ध्योः
स्वविपर्ययहेतुभावभावाभ्यां सद्व्यवहारप्रतिषेधफलत्वं तुल्यम्। एकत्र
संशयादन्यत्र विपर्ययात्। तत्र द्वितीया सद्व्यवहारनिषेधोपयोगा- A24a
त्प्रमाणमुक्ता। न तु व्यतिरेकदर्शनादावुपयुज्यते। संशयात्। अनि-

---

k–k ĪPVV I 120,11–13 (Stern: 162) l–l Ce' PV 1.198a m–m Ce'e PVSV 5,2–5

1f sakalakāraṇasyāsyārthasattāyām AC : sakalakāraṇasyārthasalakāraṇasyā{rtha}sattāyām B 2 °āsambhavāt BC : °asaṃbhavat A 3 ñid add. T 5 'pravṛtti° A : 'pratipatti° C, 'pratti° B 7 °phalaḥ BC : °phalā A 8 anyaḥ AB : anya° C 10 rab tu bstan pas T for darśanena ∘ dvayor apy AB (PVinṬ 2.77a7f) : dvayor C (api n.e. T) 11 svaviparyayahe° AC : svayaviparyahe° B ∘ sadvyavahāra° BC : sadvyavavahāra° A 12 anyatra BC : aparatra A (itaratra PVinṬ 2.77b5f)

श्चितज्ञापनाङ्गादप्रतीतेः। प्रथमा त्वत्र प्रमाणम्' निश्चयफलत्वात्॥

तद्भावमात्रान्वयिनि स्वभावो हेतुरात्मनि।

तादात्म्यं ह्यर्थस्य तन्मात्रानुरोधिन्येव' नान्यायत्ते' तद्भावेऽभूतस्य पश्चात्तादात्म्यविरोधात्कारणानां च कार्यव्यभिचारात्। तस्मात्त**द्भावमात्रानुबन्धिन** एवात्मनः **स्वभावो** गमकः॥

स चायं हेतुत्वेनोपादीयमान

उपाध्यपेक्षः शुद्धो वा नाशो कार्यत्वसत्त्ववत्॥ (k.52)

उपादीयते। अपेक्षितपरव्यापारो हि स्वभावनिष्पत्तौ भावः कृतकः।
B24b C28b तेनेयं कृतकश्रुतिः स्वभावाभिधायिन्यपि परोपाधिमेनमाक्षिपति।
एतेन प्रत्ययभेदभेदित्वादयोऽपि व्याख्याताः। एवमुपाधिभेदापेक्षः क्वचित्स्वभावो हेतुरुच्यते' क्वचिदनपेक्षो यथाऽनित्यत्व एव सत्त्वम्'

---

n–n Ce'e PVSV 5,6 o–o VNṬ 13,10f+10,18 (°ānvayini em. [cf. T] : °ād dharmini VNṬ); VK 544,32f (Stern, letter 27.9.1985); ĪPVV III 91,9; 199,24 (STERN: 163) p–p Ce'e PVSV 4,2–4 q–q Ce'e PVSV 93,5–14 (with PV 1.186) r–r NBhūṣ 288,9f (cf. STERN: 163) s–s NK 174,9f (STERN: 163) t–t Ci'e NB 3.12

---

1 tv atra illegible (erased ?) C 4 phyis 'byuṅ ba ni T for paścāt 4f tadbhāvamātrānubandhina B (de yod pa tsam daṅ rjes su 'brel ba T; cf. tatsattāmātrānusariṇa PVinṬ 2.78b7f) : tanmātrānubandhina AC 7 kāryatva° AC : kāryatve B 9 °dhim C : °dhikam AB ◦ de dag T for enam 10 pratyayabheda° AC : pratyaya° B ◦ pi A : om. BC ◦ upādhi° BC : upādhe° A ◦ bheda n.e. T 11 svabhāvo hetur ABC : svabhāvahetur PVinṬ 2.79b4f

क्वचित्स्वभावभूतधर्मभेदपरिग्रहेण[1] यथा तत्रैवोत्पत्तिः[1]। अनया दिशाऽन्येऽपि स्वभावहेतुप्रविभागा[2] द्रष्टव्याः[q]॥

[u]तस्य च स्वभावस्य[3] स्वेन साध्यधर्मेण व्याप्तिर्यदि प्रमाणेन[3] निश्चीयते। तदा गमकः। अनिश्चितायां तु व्याप्तौ धर्मिसमाश्रये वा तत्स्वभावतया गमकस्या[5]गमकत्वात्[5][u]। [v]न हि प्रकाशतया प्रकाशय[5f]न्प्रदीप[6]स्तद्रूपाप्रतिपत्तौ स्वामर्थक्रियां करोति[v]। [w]तस्मान्निश्चितो[6] व्याप्यो गमको व्यापको गम्यः[w]। [x]तस्य व्याप्यस्यायं निवर्तको व्यापकधर्मः स्वयं निवर्तमानः। [A]एवं ह्ययमस्य व्यापकः सिद्धो भवति। A24b यद्यस्याभावे न भवेत्। तदनेन द्विविधस्यापि हेतोर्गम्यगमकतालक्षणमुक्तं वेदितव्यम्॥

द्विविधो हि हेतुः प्रयोगतः साधर्म्यवान्वैधर्म्यवांश्च[x]। [y]नानयोर्वस्तुतः कश्चिद्भेदोऽन्यत्र प्रयोगभेदात्[y]। तद्दर्शनात्स्वयमपि प्रतिपत्तौ तथा स्यादिति स्वार्थेऽप्यनुमाने विभज्योच्यते[13]। [z]साधर्म्येणापि हि

---

u–u Ce'e PVSV 96,21–24 v–v Ce' PVSV 97,1f w–w Ce'e PV 1.192a–c x–x Ce'e PVSV 97,8–12 y–y Ce'e PVSV 97,13f; Ci'e NB 3.6–7 z–z Ce'e PVSV 97,14–17

---

1 °bhedaparigraheṇa AC : °parigraheṇa B (bheda n.e. T) ◦ °otpattiḥ AC : °otpattisatvaṃ B 2 °pravibhāgā AC : °vibhāgā B (: °prakārā PVinṬ 2.88a2) 3 svabhāvasya AB : bhāvasya C ◦ pramāṇena AC : pramāṇair B 5 go bar bya ba T for gamakasya ◦ go bar byed pa ma yin par 'gyur te T for agamakatvāt 5f prakāśayan AB : prakāśyan C 6 pradīpas AC : pradīpanapradīpas B ◦ ṅes pa ñid kyis T for niścitaḥ 13 vibhajyocyate em. (dbye ba bstan T) : vibhajyocyete B : vibhajyate A : vibhajyac?ā?rp/yāt? C (: vibhajyete PVinṬ 2.81b5)

C29a प्रयोगेऽर्थाद्वैधर्म्यगतिः। असति तस्मिन्साध्येन हेतोरन्वयाभावात्*। तथा वैधर्म्यैणाप्य*न्वयगतिः। असति तस्मिन्साध्याभावे हेत्वभावस्य B25a सन्देहादिति वक्ष्यामः[za] [b]तौ पुनर्हेतू यत्किञ्चित्कृतकं तत्सर्वमनित्यम्। यथा घटादयः। शब्दश्च कृतक इत्यन्वयी। सामर्थ्यादेवा*त्रानित्यः शब्द इति भवति। तस्मान्नावश्यं पक्षनिर्देशः कर्तव्यः*। व्यतिरेक्यपि नानित्यत्वाभावे कृतकत्वं भवति। शब्दश्च कृतक इति। सिद्ध*तत्स्वभावतया तदभावे न भवतः कृतकत्वस्य शब्दे च भावख्यातौ तदात्मनः सतो भाव इति सामर्थ्या*त्तत्सिद्धेर्नानुमेयवचनम्। अन्वयस्त्वर्थापत्त्या सिद्धः। न ह्यतदात्मनियतस्य तन्निवृत्त्या निवृत्तिः। तस्मान्नियमं प्रसाध्य निवृत्तिर्वक्तव्या[b]॥

[c]कथमिदानीं कृतकोऽवश्यमनित्य इति प्रत्येतव्यः*। येनैवमुच्यते। यस्माद्

[d]**अहेतुत्वाद्विनाशस्य स्वभावादनुबन्धिता।**

न हि भावा विनश्यन्तस्तद्भावे हेतुमपेक्षन्ते। स्वहेतोरेव नश्वराणां*

---

[a] Cf. below 92,2ff   [b–b] Ce'e PVSV 97,19–98,2   [c–c] Ce' PVSV 98,4–12 (with PV 1.193c–194b)   [d–d] Only k.53: NPṬ 79,7f; NBhūṣ 526,23f

---

1 °ābhāvāt AC : °āyomāt B   2 vaidharmyeṇāpy ABC (: vaidharmmye 'pi PVinṬ 2.82a2, cf. chos mi mthun pa la yaṅ T; PVSV)   4 eva n.e. T   5 kartavyaḥ A : om. BC   7 siddha° n.e. T   8 tat° n.e. T   11 bśad par bya T for pratyetavyaḥ   14 naśvarāṇām A : vinaśvarāṇām BC

भावात्। तस्माद्यः कश्चित्*कृतकः स प्रकृत्यैव* नश्वरः। [A]तथा हि A25a

[e]सापेक्षाणां हि* धर्माणां*नावश्यम्भावितेक्ष्यते[d]॥ (k.53)

निरपेक्षो भावो विनाशे। सापेक्षत्वे हि घटादीनां* केषाञ्चिन्नित्यतापि स्यात्[c]। [f]यद्यपि बहुलं विनाशकारणानि सन्ति। ते[2]षामपि स्वप्रत्ययाधीनसन्निधित्वान्नावश्यं सन्निधानमिति कश्चिन्न विनश्येदपि। न ह्यवश्यं* हेतवः फलवन्तः*। वैकल्यप्रतिबन्धसम्भवात्[e]॥

एतेन व्यभिचारित्वमुक्तं कार्याव्य[3]वस्थितेः।
सर्वेषां नाशहेतूनां हेतुमन्नाशवादिनाम्*॥ (k.54)

[C]इत्यन्तरश्लोकः। तदयं* भावोऽनपेक्षस्तद्भावं प्रति तद्भावनियतः। C29b
[B]असम्भवत्प्रतिबन्धेव कारणसामग्री* स्व[4]कार्योत्पादने॥ B25b

नन्वनपेक्षाणामपि केषाञ्चित्*क्वचिन्नावश्यं तद्भावः*। भूमिबीजोदकसामग्र्यामपि कदाचिदङ्कुरानुत्पत्तेः*। न। तत्रापि सन्तानपरिणामापे[5]क्षत्वात्। नैवं भावस्य कदाचिदपेक्षा। तत्राप्यन्त्या सामग्री*

---

e–e DAṬ 185,12–16 f–f Ce'e PVSV 98,14–99,2 (with PV 1.195)

---

[1] kaścit BC : kaści A ◦ eva n.e. T [2] hi AC : om. B ◦ dharmāṇāṃ B (chos rnams T, NBhūṣ, NPṬ) : bhāvānāṃ AC, PVinṬ 2.85a3 (PV 1.194a) [3] ghaṭādīnāṃ AB : ghaṭānāṃ C [5f] na hy avaśyaṃ ABC (: nāvaśyam PVinṬ 2.85a7) [6] °vanto AB : °vanto bhavanti C [7f] etena → °vādinām illegible in A [7] °āvyavasthiteḥ AC : °avyavasthiteḥ B [9] tad ayaṃ BC : tadāyaṃ A ◦ gźan la ltos pa med pa T for anapekṣaḥ [10] rgyu tshogs pa thams cad T for kāraṇasāmagrī (cf. PVSV) [11] anape° AB : ape° C ◦ keṣāñcit n.e. T ◦ tadbhāvo AB : bhāvaḥ | C [12] °ānutpatteḥ AB : °ānupapatteḥ C [13] rgyu tshogs pa T for sāmagrī

याऽव्यवहिता कार्योत्पत्तेः' सा फलवत्येव। सैव तत्राङ्कुरहेतुः' पूर्वः परिणामस्तदर्थः। न च तां कश्चित्प्रतिबन्धुं समर्थ इत्युक्तप्रायम्[fg]॥

[h]ननु यवबीजादयोऽपि शाल्यङ्कुरे जन्येऽनपेक्षाः' तदुत्पत्तिप्रत्ययानां कदाचित्तत्रापि सन्निधानात्। कथं न सापेक्षाः। यावता स एवैषां स्वभावो नास्ति यस्तदुत्पादनः शालिबीजस्येति तत्स्वभावापेक्षाः। एवं तर्हि कृतकानामपि केषाञ्चित्सतां वा स एव स्वभावो A25b नास्ति यो विनश्वरः। तत्स्वभावापेक्षत्वान्न नश्वराः। शाल्यादिबीजानामपि स स्वभावः स्वहेतोरिति यो न तद्धेतुः सोऽतत्स्वभावः स्यात्। नियतशक्तिश्च स हेतुः स्वरूपेण प्रतीत एव। न च स्वभावनियमोऽर्थानामाकस्मिको युक्तः' अनपेक्षस्य देशकालद्रव्यनियमा- C30a योगात्। तथात्रापि कश्चिन्नियमहेतुर्वक्तव्यो यत इमे केचिन्नश्वरात्मानो जाताः। न चात्र कश्चिन्नियामकः स्वभावस्यास्ति' सर्वजन्मिनां विनाशसिद्धेः। जन्मिस्वभावो नाशीति चेत्' न वै जन्म नाशिस्व- B26a भावस्य हेतुः' न चाहेतोः स्वभावनियमः। तस्मान्नात्र कश्चिद्धेतोः स्वभावप्रविभागः। तदभावात्फलस्यापि नास्तीत्यसमानम्[h]॥

---

[g] Cf. above 61,1–5; 63,7–12 [h–h] Ce'e PVSV 99,4–19

---

[1] saiva tatrā° AC : saivātrā° B [2] der ni de la ... ma yin T for na ca tām [4] sāpekṣāḥ | C : sāpekṣā AB [5f] °āpekṣāḥ | AB : °āpekṣā | C [7] naśvarāḥ A : vinaśvarāḥ BC [8] sa n.e. T [9] pratīta BC, PVinṬ 2.87b2 : pratīyate A [13] de'i skye ba T for janma [14] svabhāva° BC : svabhāvasya A

[i]नन्विदमप्यनिश्चेयमेवं* – सर्वसामग्रीजन्मानो* नश्यन्तीति' तासामनिःशेषदर्शनात्। विचित्रशक्तयो हि सामग्र्यो* दृश्यन्ते। तत्र काचित्स्यादपि [5]याऽनश्वरा*त्मानं जनयेत्[i]। न' [j]अर्थक्रियाशक्तिलक्षणत्वाद्वस्तुनः[j]। [k]सर्वसामर्थ्योपाख्याविरहलक्षणं हि निरुपाख्यम्[k]॥

चरमस्य तर्हि क्षणस्या*नुपाख्यताप्रसङ्गः। [6]न' सत्त्वसङ्घातक्षणान्तरानुपादानता*लक्षणत्वाच्चरमत्वस्य। भवत्येव हि तस्यापि ज्ञेयव्यापिनि ज्ञानेऽन्तशः सामर्थ्यं विरूपेऽपि धातौ। धात्वन्तरे* त्वनेकोपकार एवं* स्यात्। अना[7]भोगेऽसामर्थ्यमिति चेत्' न' अनाभोगासम्भवात्' एकधर्मस्याप्यज्ञाने परार्थवृत्तेः कार्याकार्यानवबोधात्' सर्वत्र शङ्कोत्पत्तेः' सर्वस्य* क्वचित्कथञ्चिदुपकारात्' तदज्ञाने तद*ङ्ग[A]वि- A26a
कलत्वादक्षू*णविधानायोगात्। नापि चरम*[C]स्यासामर्थ्यमेव' कस्यचि- C30b
त्करणात्*। अकारिणोऽपि प्रत्ययवैकल्ये* स्यात्। साकल्ये तु करोत्येव॥

[i–i] Ce'e PVSV 149,18–20 (Yoshimizu 1999: 244f) [j–j] Ci' NB 1.15 [k–k] Ci' VN 2,5

---

[1] eva AB : om. C (n.e. T) ◦ sarvasāmagrījanmāno C : sāmagrījanmāno B : sarvvasarvvasāmagrījanmāno A [2] 'di ltar dṅos po rnams kyi tshogs pa T for sāmagryaḥ [3] yā anaśvarā° A, yā'naśvarā B : {ṣ}yā cānaśvarā° C [5] kṣaṇasyā° AB : kṣaṇasasyā° C [6] °upādānatā° A : °upādāna° BC [7] pi AB : tu C ◦ °antare AC : °āntare B [8] eva n.e. T [10] sarvasya n.e. T ◦ Change of scribal hand in A [11] tshaṅ ba med pa T for akṣūṇa° (cf. BHSD) ◦ carama° AB : caramama° C ◦ °āsāmarthyam B : °āmarthyam A [12] karaṇāt AC : kāraṇāt B ◦ °vaikalye AB (cf. vaikalyāt PVinṬ 2.90a4) : °vaikalyam C

नैवमक्षणिकस्य' सर्वथासम्भवात्। न हि तस्याक्षणिकस्यार्थक्रिया सम्भवति' क्रमयौगपद्यविरोधात्। अक्रमः' अनपेक्षस्य कर्तुः स्वसत्तामात्रेण क्षेपायोगात्' प्रागकर्तुः पश्चादपि स्वभावापरावृत्तेः। अपेक्षायां चोक्तम्[l]। नापि युगपत्क्रिया' तत्स्वभावस्य पश्चादप्यक्रियायोगात्। B26b तदयं भावो निवृत्तसर्वसामर्थ्यः सत्तालक्षणमतिपतति॥

[mn]अर्थक्रियासमर्थं यत्तदत्र परमार्थसत्[n]।
[o]असन्तोऽक्षणिकास्तस्यां क्रमाक्रमविरोधतः[om]॥ (k.55)

इति सङ्ग्रहश्लोकः॥

स्कन्धधात्वायतनलक्षणस्य वा कृतकस्यानित्यतासाधनाददोषः' अतद्रूपस्याप्रमाणतयासिद्धेरन्वयविधानायोगात्। तदेव च नः कृतकं यथोक्तम<u>भिधर्मे</u> – [p]कतमे धर्माः संस्कृताः। पञ्चस्कन्धा[p] इति। तत्र पञ्चेन्द्रियाणि स्वभावच्युतिमन्ति' तत्कार्यविज्ञानविच्छेदविकारदर्शनात्' तादवस्थ्ये च तेषां तदयोगादपेक्षाविरोधाच्च। तथा विषयाः

---

[l] Cf. 67,8ff [m–m] MṛV 86,1f; NBhūṣ 509,18f [n–n] Ce' MṛV 87,20; PV 3.3ab (cf. PV 1.166ab) [o–o] NVTP 288,11 [p–p] Cf. AK 1.7b with AKBh 4,20

1f tasyākṣaṇikasyārtha° AB : tasyārtha° C 2 rim gyis ni ma yin te T for akramaḥ 5 apy akriyā° AC : api kriyā° B ∘ bhāvaḥ n.e. T ∘ nivṛtta°B : vinivṛtta° AC 7 °sat BC : °sataḥ A 8 tasyāṃ AC (de la T) : tasmāt B 9 saṃgraha° BC : saṃgrahaḥ A 10 vā AC : om. B ∘ kṛtaka{tva}syā° A : kṛtakatvasyā° BC ∘ adoṣaḥ BC : aṣaḥ A 12 dharmāḥ n.e. T 14 teṣāṃ AC : om. B

सुखदुःखे निमित्तोपलक्षणं रागादयो विषयोपलम्भश्च प्रतिविदितै-
वोपयन्त्यपयन्तीत्यनित्याः। त एवम्प्रकृतयः स्वहेतुप्रकृतिमेवंरूपां C31a
साधयन्तस्तथाविधजन्मनामन्येषां च स्वभावमेनमालगयन्ति।
एतेन धात्वायतने व्याख्याते। धर्मधात्वायतनेऽपि स्कन्धत्रयस्वभाव A26b
एवेति न विरोधः। एतेन सत्ता व्याख्याता॥

किं तर्हीदानीं विनाशेऽनपेक्षायाः सामर्थ्यम्' यावता स्कन्धाद्-
योऽन्यैरेव हेतुभिरनित्याः साध्यन्ते। केषाञ्चिदनित्यत्वसिद्धौ तथावि-
धानां तद्व्याप्तिरनपेक्षायाः। हेतुसत्त्वे तु विनाशस्य कस्यचित्तथाभा-
वेऽप्यन्यत्र हेतोर्वैकल्यादविनाशोऽपि स्यादित्यव्याप्तिः। [९]सेयं निरपे-
क्षता विनाशस्य क्वचित्कदाचिच्च भावविरोधिनी तदभावं स्वभावेन
साधयति। यो हि स्वभावो निरपेक्षः' स यदि कदाचिद्भवेत्क्वचिद्वा B27a
तत्कालद्रव्यापेक्ष इति निरपेक्ष एव न स्यात्॥

स तर्हि विनश्वरस्वभावो निरपेक्ष इत्यहेतुकः स्यात्। नाहेतुकः'
सत्ताहेतोरेव भावात्तथोत्पत्तेः' सतो हि भवतस्तादृशस्यैव भावात्। C31b

---

९–९ Ce'e PVSV 99,19–100,13

---

1 °duḥkhe AB : °duḥkha° C 1f pratividitā evo° AB : pratisaṃviditā evo° C 3 sādhayantas A : prasādhayantas BC 4 °āyatane AB : °āyatanāni C; kyaṅ add. T • vyākhyāte AB : vyākhyātāni C 5 eva n.e. T • kyaṅ add. T 7 keṣāṃcid AC : koṣāñcid B 8 tadvyāptir B (des khyab pa T) : tathā vyāptir A : tattat*vyāptir C • anapekṣāyāḥ AC : anapekṣāmmaḥ B 9f rgyu la ltos pa med pa ñid 'dis T for nirapekṣatā 11 bhavet AB : bhavati C 12 °pekṣa B, °pekṣaḥ | C : °pekṣya A 13 vinaśvara° AB : vinaśvaraḥ C

नावश्यं सतः कुतश्चिद्भाव इति चेत्' आकस्मिकी तर्हि सत्तेति नेयं कस्यचित्क्वचित्कदाचिद्विरमेत्। तद्धि किञ्चिदुपलीयेत न वा यस्य यत्र किञ्चित्प्रतिबद्धमप्रतिबद्धं वा। सेयं सत्ताऽप्रतिबन्धिनी चेत्' न नियमवती स्यात्। तस्मान्नेयमाकस्मिकी क्वचित्। कथं तर्हीदानीमहेतुको विनाशः' जातस्य तद्भावेऽन्यानपेक्षणात्। अपि च न विनाशो नामान्य एव कश्चिद्भावात्' किं तु भाव एव विनाशः' स एव A27a क्षणस्थायी जात इति। तमस्य मन्दाः स्वभावमूर्ध्वं व्यवस्यन्ति' न प्राक्' दर्शनेऽपि पाटवाभावादिति तद्दर्शनेन पश्चाद्व्यवस्थाप्यते' विकारदर्शनेनेव विषमज्ञैः। तदयं सत्ताव्यतिरेकेण नान्यत्किञ्चिद्विनाशोऽपेक्षत इति तद्व्यापी॥

कथं पुनरेतद्गम्यते – निरपेक्षो विनाश इति॥

असामर्थ्याच्च तद्धेतोः

अभावकारिणः क्रियाप्रतिषेधाच्चेति **च**शब्दात्। कथमसामर्थ्यम्। सिद्धे हि भावे कारको न तं करोति। नाप्यन्यक्रियायां तस्य किञ्चित्' तादवस्थ्यात्। अतस्तन्नाशनो नान्यकारी। तेनायं तदतद्रूपाकरणादकिञ्चित्करो नापेक्ष्यते॥

---

r–r Ce'e PVSV 100,13–24

---

1 ākasmikī tarhi sa° illegible in A 2 kasyacit n.e. T 3 °bandhinī A : °bandhinīti BC • na A : tadā na BC 5 vināśaḥ BC : vināśāḥ A 6 kiṃ tu AB : om. C 7 kṣaṇasthāyī BC : kṣaṇas?ātasthāyī A 9f vināśo AB : nāśo C 11 gamyate AB : avagamyate C 13 kriyā° BC : kiyā° A 15 tādavasthyāt n.e. T • des na T for atas tat 16 nāpekṣyate AB : nāpekṣata iti C

कथं क्रियाप्रतिषेधः। विनाश इति हि भावाभावं मन्यन्ते। तदयं B27b विनाशहेतुरभावं करोतीति प्राप्तम्। तत्र यद्यभावो नाम कश्चित्कार्यः स्यात्स्वभावः स एव भाव इति नाभावः स्यात्। तद्भावं करोतीति भावं न करोतीति क्रियाप्रतिषेधोऽस्य कृतः स्यात्। तथाप्ययमकि- C32a श्चित्करः किमित्यपेक्षत इति सिद्धा विनाशं प्रत्यनपेक्षता भावस्य॥

तस्माद्

भवत्येष स्वभावतः।
यत्र नाम भवत्यस्मादन्यत्रापि स्वभावतः॥ (k.56)

सोऽयं क्वचिद्भवन्दृष्टोऽनपेक्षत्वा**त्स्वभावत एव भवति। तथान्यत्रापि स्वभावभावी**। विशेषाभावात्॥

एवमन्येऽपि स्वभावहेतवो यथास्वं प्रमाणैः सिद्धतन्मात्रानुबन्ध एव साध्यधर्मे गमका वेदितव्याः। यो हि भावमात्रानुबन्धी स्वभावः। तत्रैवाविनाभावो भावस्य। भावमात्रानुरोधी स्वभाव इति स A27b एव स्वयं वस्तुतो भावः। स चात्मानं परित्यज्य कथमन्यत्र

s–s Cf. NB 3.15 t–t Ce'e PVSV 24,11f u–u Ce'e PVSV 24,14f

1 hi A (PVinṬ 2.97a1, PVSV) : ca C : om. B 4 bhāvaṃ na AC : na bhāvaṃ B ◦ asya n.e. T 5 praty BC : paty A ◦ gźan la ltos pa med par T for anapekṣatā 7 eṣa B : eva A 10 svabhāva° C : svava° B : svabhāvā° A ◦ viśeṣābhāvāt AB : om. C 11 pramāṇaiḥ BC : pramāṇeḥ A ◦ siddha° C : siddhaṃ B, siddhan A 12 °dharme n.e. T ◦ dṅos po de tsam T for bhāvamātra 13 bhāvasya n.e. T ; ṅes pa yin add. T 14 vastuto AB : vastuno C ◦ anyatra n.e. T

भवेदिति॥

^v अर्थान्तरे तु गम्ये कार्यं हेतुः' अव्यभिचारात्।^v न ह्यतदुत्पत्तेर-व्यभिचारः' ^w अनायत्तरूपा[2]णां सहभावनियमाभावात्॥^w

यद्यर्थान्तरं हेतुः' कथं तर्हीदानीं* स तस्य धर्मः। तदाश्रयात्। कथं कार्यकारणभावः। अत एव' अन्यथाश्रयासिद्धेः। ननु च प्रदेश आश्रयोऽग्निः* का[3]रणं धूमस्य। सोऽपि हि धूमस्य तत्कारणानां वा प्रतिष्ठानाद्धेतुरेव॥

^x यदि तदुत्पत्तेः कार्यं गमकम्' तदा* सर्वथा गम्यगमकभावः'

B28a सर्वथा जन्यजनकभावात्। न' तद[4]भावे* भवतस्त[B]दुत्पत्ति*नियमाभा-

C32b वात्। [C]तस्मात्

कार्यं स्वभावैर्यावद्भिरविनाभावि कारणे।

तेषां

हेतुः

तत्कार्यत्वनियमात्। तैरेवं* धर्मैर्ये तैर्विना न भवन्ति। [5]अंशेन* जन्यज-

---

^{v–v} Ci'e HB 19,14 ^{w–w} Ce' PVSV 3,9 ^{x–x} Ce'e PVSV 3,9–19 (cf. HB 19,15–20,1)

---

3 °āyatta° AB : °āyata° C 4 idānīm n.e. T 6 'gniḥ AC : agnir hi B 7 pratiṣṭhānād ABC is supported by pratiṣṭhānād adhikaraṇatvāt (PVinṬ 2.100b7) 8 tadā n.e. T 9 tadabhāve AB : tadbhāve C ◦ tadutpatti° AB : tadutpatter C 14 eva AB : eva ca C ◦ aṃśena AB : aṅgena C

नकत्वप्रसङ्ग इति चेत्' न' तज्जन्य*विशेषग्रहणेऽभिमतत्वाल्लिङ्गविशेषोपाधीनां च सामान्यानाम्। अविशिष्टसामान्यविवक्षायां व्यभिचारान्नेष्यते[x]॥

[y]कथमिदं गम्यते – न धूमोऽग्निं व्यभिचरतीति[y]॥

[z]तद्व्यभिचारेऽस्य हेतुमत्ताव्यतिक्रमात्[z]॥ (k.57)

[a]येषामुपलम्भे तल्लक्षणमनुपलब्धं यदुपलभ्यते' तत्रैकाभावेऽपि* नोपलभ्यते' तत्तस्य कार्यम्। तच्च धूमेऽप्यस्ति[a]। [b]स सकृदपि तथादर्शनात्तत्कार्यः* सिद्धः। अकार्यत्वेऽकारनात्सकृदप्यभावात्[b]॥

नन्वरणिनिर्मथना*दिष्वसत्यप्यग्नौ भावादकार्यम्*। न' इन्धनवि- A28a
कारहेतोरुष्णस्पर्शविशेषस्याग्नित्वात्। [c]कार्यस्य च कारणमन्तरेण भावेऽहेतुतैव* स्यात्। न हि यस्य यमन्तरेण भावः' स तस्य हेतुर्भवति। भवति च धूमोऽग्निमन्तरेण' तन्न तद्धेतुः स्यात्। अन्यहेतुकत्वान्नाहेतुकं* इति चेत्' न' तत्रापि तुल्यत्वात् – तदभावेऽप्यग्नौ* भवतीति। कथं च* ततोऽन्यतो वाऽतज्जननस्वभावाद्भवेत्। स्वयम-

---

[y–y] Ce'e PVSV 21,25f [z–z] Ce'e PV 1.34cd [a–a] Ce' PVSV 22,2–4 [b–b] Ce' PVSV 22,6f [c–c] Ce'e PVSV 22,7–17

---

1 tajjanya° BC : tajanya° A 6 de las gcig ma tshaṅ na T for tatraikābhāve 'pi 8 tatkāryaḥ C (de'i bras bur T) : kāryaḥ AB 9 nirmathanā° BC : ninirmathanā° A ◦ akāryam AC : akāryatvam B 11 eva n.e. T 13 nāhetuka B : nāhetukam AC ◦ tadabhāve AB : tadbhāve C ◦ me yod na T for agnau 14 kathañ ca C (yaṅ na … ji ltar T; katham vā PVSV) : katham AB

तत्स्वभावस्याजननात्तस्याहेतुता स्यात्॥

C33a न वै स एव भवति[*]' [C]तादृशस्य भावात्। अन्यादृशाद्भवन्कथं तादृशः[*]। [4]तादृशाद्धि भवं[*]स्तादृशः स्यात्। अन्यादृशादपि तादृशोद्भवे
B28b तच्छक्तिनियमाभावान्न हेतुभेदो भेदक इत्यकारणं विश्वस्य[B] वैश्वरूप्यं स्यात्[c]। तत्र [5]चोक्तो[d] दोषः। [e]सर्वं च सर्वस्माज्जायेत[e]। तस्मात्कारणभेदाभेदाभ्यां कार्यभेदाभेदौ। तन्न धूमोऽर्थादृष्टा[*]कारविजातीयाद्भवति' अहेतुत्वप्रसङ्गात्॥

[6]तथा च[*]

[f]नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः[f]॥ (k.58)

स हि धूमोऽहेतुर्भवन्निरपेक्षत्वान्न कदाचिन्न[*][7] भवेत्' तद्भावे वैकल्याभावादिष्टकालवत्। तदापि वा न भवेत्' अभावकालाविशेषात्। अपेक्षया हि भावाः कादाचित्का भवन्ति' भावाभावकालयोस्त-
A28b द्भाव[A]योग्यतायोग्यतायोगात्' तुल्ययोग्यतायोग्यतयोर्देशकालयो[*]स्तद्वत्तेतरयोर्नियमायोगात्। सा च योग्यता हेतुभावात्किमन्यत्। तस्मादेकदेशकालपरिहा[2]रेणान्यदेशकालयोर्वर्तमानो भावस्तत्सापे-

---

[d] Cf. 78,9–11 [e–e] Ce'e PVSV 22,17–23,26 [f–f] Ce' PV 1.35

---

[2] bhavati BC : bhavatīti A [2f] tādṛśaḥ BC : tādṛśaḥ syāt A [3] bhavaṃs C (bhavan A): bhāvāt sa B [6] dṛṣṭā° AB : adṛṣṭā° C [8] ca AC : om. B [11] nirapekṣatvān na kadācin AC : kadācit[0] B [14f] °kālayos AC : °kālayo B

क्षो नाम भवति। तथा हि तथावृत्तिरेवापेक्षा' तत्कृतोपकारानपेक्षस्य तन्नियमायोगात्। तन्नियत*[C]द्देशकालत्वाद्धूमो* [3]यत्र दृष्टः सकृद्वैकल्ये च C33b
पुनर्न दृष्टः' तज्जन्योऽस्य स्वभावः' अन्यथा सकृदप्यभावात्। स तत्प्रतिनियतोऽन्यत्र कथं भवेत्। भवन्वा* न धूमः स्यात्तज्जनि[4]तो हि स्वभावविशेषो धूम इति। तथा हेतुरपि तथाभूतकार्यजननस्वभावः। अन्यतो*ऽपि भावे न स तस्य स्वभाव इति सकृदपि न जनयेत्। न वा [5]स धूमः' अधूमजननस्वभावाद्भावात्*। तत्स्वभावत्वे च स एवाग्निरित्यव्यभिचारः॥

अग्निस्वभावः शक्रस्य मूर्धा [B]यद्यग्निरेव सः। B29a
अथानग्निस्वभावोऽसौ धूमस्त[6]त्र कथं भवेत्॥ (k.59)

धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान्।
अधूमहेतोर्धूमस्य भावे स स्यादहेतुकः॥ (k.60)

इति सङ्ग्रह*श्लोकौ॥

कथं तर्हीदानीं भिन्नात्सहकारिणः* का[7]र्योत्पत्तिर्यथा चक्षूरूपादेर्विज्ञानस्य। न वै किञ्चिदेकं जनकं तत्स्वभावं वा। किं तु* सामग्री ज-

2 niyata° AB : niyama° C ◦ °tvād BC : °tvātā A ◦ de add. T 4 vā BC : vya A 6 anyato C : ataś cānyato AB : de gźan las T (cf. tasyānyato PVSV) 7 °svabhāvād bhāvāt BC : °svabhā{vo}‹bhā›vāt A 13 saṃgraha° AC : antara° B 14 sahakāriṇaḥ AC : sahakaṇaḥ B 15 kin tu AB : kiṃ tarhi C

निका तत्स्वभावा। सैवानुमीयते। सैव च सामग्री स्वभावस्थित्याA29a श्रयः कार्यस्य। अत एव सहकारिणामप्यपर्यायेण जननम्॥

यदपि किञ्चिद्विजातीयाद्भवद्दृष्टं गोमयादेः शालूकादिः' तत्रापि तथाभिधानेऽप्यस्त्येव स्वबीजप्रभवात्स्वभावभेदो हेतुस्वभावभेदात्' C35a यथा कदली बीजकन्दोद्भवा। स्फुटमेव तादृशं भेदं लोको विवेचयत्याकारभेदात्॥

[g]अनन्तरं वा कारणं कार्यमनुमापयति। तत्तुल्यरूपाणां कार्यद्रव्याणां तुल्यम्' यथा प्रवृद्धयोः कदल्योः कन्दोद्भवः। यत्र तु साक्षाद्धेतुभेदः' तत्र रूपभेदोऽपि' यथा तयोरेव बीजकन्दोद्भवयोः[g]। तद्यतो यादृशं दृष्टम्' ततस्तादृशमनुमीयते। विप्रकृष्टायां तु हेतुपरम्परायामननुमानमेवेत्यव्यभिचारः। [h]नाप्याकारभेद एव तदतत्त्वे निबन्धनम्' अपि तु स्वभावान्तरमपि। कृत्रिमाकृत्रिमाणामिव मणिमुक्ताप्रवालादीनाम्। क्वचित्पुष्पे भेदो नीलेतरकुसुमयोरिव B29b सूर्ययोः' क्वचित्फले वन्ध्येतरयोरिव कर्कोटकयोः' क्वचिद्रसे वन्ये-

---

g–g Ci' ĪPVV III 88,17–20 (STERN: 163) h–h Ci'e TR 66,1–6 (Krasser; cf. STERN: 163)

---

1 °svabhāvā saivā° em. (PVSV) : °svabhāvā vā saivā° C (PVinṬ 2.108a2) : °svabhāvāṃ saivā° A : °svabhāvāṃm evā° B ◦ ca AC : om. B 3 °ādiḥ C : °ādi AB 4 °prabhavāt BC : °pabhāvāt A 5 kadalī AC : kalī B ◦ folio 34 is lacking in C ◦ eva BC : e A ◦ bhedaṃ AC : om. B (n.e. T) 7 kāraṇaṃ AC : om. B ◦ tat BC : ta A 7f kārya° C ('bras bu'i T) : kāryaṃ AB 8 rjes su 'brel ba'i T for pravṛddhayoḥ 11 avyabhicāraḥ AB : avyabhicārāt C 14 vandhye° AC : vanye° B

तरयोरिव त्रपुषयोः' क्वचित्प्रभावे स्पर्शोपयोगस्रंसिन्योरिव* हरीतक्योः। [i]तस्मान्[j]न सुविवेचितं कार्यं कारणं व्यभिचरति[j i h]। हेतुविशेषेऽपि कार्याविशेषे दोषात्॥

[k]अन्वयव्यतिरेकाद्यो [6] यस्य दृष्टोऽनुवर्तकः।
स्वभावस्तस्य तद्धेतुरतो भिन्नान्न सम्भवः[k]॥ (k.61)

[l]कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्॥ (k.62)

अवश्यम्भावनियमः कः परस्यान्यथा [7C] परैः*। C35b
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत्[l]॥ (k.63)

इति सङ्ग्रहश्लोकाः॥

अपि च

[mn]अर्थान्तरनिमित्तो हि धर्मः स्यादन्य एव सः[n]।

न हि तस्मिन्निष्पन्ने*ऽनिष्पन्नो भिन्नहेतुको वा तत्स्वभावो युक्तः। [o]अयं* हि भेदो [A]भेदहेतुर्वा* भावानां यदुत विरुद्धधर्माध्यासः कारण- A29b

---

[i–i] Ce'e PVSV 23,26f [j–j] Ci'e TBV 266,13; NKC 604,6 (Stern: 163) [k–k] Ce' PV 1.38 [l–l] Ce' PV 1.31–32 [m–m] Ce'e PVSV 20,8–21,6 [n–n] Ce' PV 1.33ab [o–o] Cf. HBṬ 47,5–8 (Stern, letter 15.5.1981)

---

1 °sraṃsinyor em. : °sraṃśinyor C, °sraṃminyor A, °sranminyor B (°śrayiṇyor TR) 8 paraiḥ BC : paparaiḥ A 13 tasmin AC : yasmin B 14 'di kho na T for ayam ◦ vā BC : om. A

भेदश्च। ततश्चेन्न भेदसिद्धिः न कस्यचित्कुतश्चिद्भेद इत्येकं द्रव्यं विश्वं स्यात्। ततः [p]सहोत्पत्तिविनाशौ सर्वस्य च सर्वत्रोपयोगः स्यात्[p]। अन्यथैकमित्येव न स्यान्नामान्तरं वा। अर्थभेदमभ्युपगम्य तथाभिधानात्॥

नन्वनर्थान्तरहेतुत्वेऽपि भावकालेऽनित्यतानिष्पत्तेस्तुल्यातत्स्व-
भावता। न वै काचिदनित्यता नामान्या या पश्चान्निष्पद्येत। स एव
हि भावः क्षणस्थितिधर्माऽनित्यतेत्युक्तप्रायम्। वचनभेदेऽपि धर्मि-
धर्मतया निमित्तं[m] [q]भेदान्तराक्षेपानाक्षेपावित्यादिप्रसङ्गः[q] प्रमाणवार्त्ति-
B30a के[r] निर्णीतः। [s]तमस्य स्वभावं मन्दबुद्धिः पश्यन्नपि न व्यवस्यति स-
त्तोपलम्भेन सर्वदातद्भावशङ्काविप्रलब्धः सदृशापरोत्पत्तिविप्रलब्धो
वा। अन्त्यक्षणदर्शिनां निश्चयात्पश्चादस्यानुपलब्ध्यास्थितिप्रतिपत्ते-
C36a र्निश्चयकाल इति तदाऽनित्यता व्यवस्थाप्यत[s] इत्यप्युक्तम्। [t]अन्य-

p–p Ci'e BS 53,6–7 (STERN: 163) q–q Ce PV 1.61ab r Cf. PV 1.60–63
s–s Ce'e PVSV 21,6–11; cf. above p. 82,7–9 t–t Ce'e PVSV 21,13–23

1 °siddhis AC : °siḥ B ◦ na B : tadā na AC ◦ bheda BC : bhedasiddhir A 2 tataḥ A : tataś ca BC ◦ ca AC : om. B ◦ sarvvatropayogaḥ AB : sarvvopayogaḥ C 3 anyathaikam BC : anyeścaikam A ◦ °bhedam n.e. T ◦ abhyupagamya AC : upagamya B 5 anarthā° AB : arthā° C 6 nāmānyā AC : nāma B 7 ukta° AC : uktaṃ B 9 svabhāvaṃ AC : subhāvam B ◦ api AB : api ca C 10 sarvadā° AB : sadā° C ◦ de ltar T for tat ◦ sadṛśāparotpatti° C ('dra ba gźan 'byuṅ gźan 'byuṅ bas T, cf. PVSV 21,9) : sadṛśāparāparotpatti° AB (cf. PVSV 26,20f) 11 °darśināṃ C : °daśinān AB ◦ asya AC : om. B 12 tadā AC : dā B ◦ ity apy C (źes kyaṅ T) : ity AB

थार्थान्तरमेवा*नित्यता स्यादन्यनिमित्तत्वेऽनिमित्तत्वे* वा। तथा च भावस्तद्भावान्न स्यात्' अनुपयोगात्। उपयोगे वा स* एवास्य स्वात्मभूताऽनित्यतेति किमन्यया। स्वभावेन वाऽचल*स्यार्थान्तरयोगेऽपि तद्भावानुपपत्ते*ः। स चार्थान्तराद्भवन्ननित्यतान्यो वा धर्मो हेतु*ः फलं वा स्यात्' अहेतुफलस्यासम्बन्धात् तत्र भावानुमानस्यासम्भवात्। तत्र

पश्चाद्भावान्न हेतुत्वं फलेऽप्येकान्तता कुतः॥ (k.64)

स हि निष्पन्ने भावेऽर्थान्तरत*ः पश्चाद्भवन्कथं तस्य* हेतुः स्यात्। फलस्यापि परोपस्कारा*पेक्षिणो नावश्यं हेतौ भाव इति* तद्भावहेतोरनैकान्तिकत्वम्। भावमात्रभावित्वे* सिद्धा*न्यानपेक्षणादहेतुता तन्मात्रानुबन्धश्च। ततोऽपि कस्यचिद्भावे तदनु*पयोगादप्रच्युतिरिति पूर्व*ः A30a
प्रसङ्गः। तन्नाविनाश*स्वभावे भावे* तद*नुमानम्॥

कथं नानुमानं* यावता नानित्यताऽभावे* क्वचिदुत्पत्तिर्दृष्टा' अद-

---

u–u Ce' PV 1.33cd

---

